Chap-1

# प्रथमा दृष्टिः।

## ज्योतिःशास्त्रेतिहासः।

(०१-६०)

## प्रथमा दृष्टिः।

### ज्योतिःशास्त्रेतिहासः।

स जयति सिन्धुरवदनो देवो यत्पादपङ्कजस्मरणम्।
वासरमणिरिव तमसां राशीन्नाशयतु विघ्नानाम्।।

ऋग्वेद–यजुर्वेद–सामवेद–अर्थवेदानां कस्यश्चिदपि भागस्थ सूक्तं वा मन्त्रो वा पादं वा सावधानतया पठ्येत तर्हि ज्योतिर्विज्ञान सम्बन्धिनः शब्दानां संज्ञानां वा नामनिर्देशोऽभीक्ष्णं पठ्यते। तद्यथा आकाशं चन्द्रसूर्यो रश्मिर्नक्षत्रं तारकाणि संवत्सरम् ऋतवो मासाः दिनं रात्रिश्चेत्यादि पदानां संदर्भो न केवलं प्राप्यतेऽपितु तेषां पदानां स्वरूपं मनोहरतया रोचकतया अश्चर्योद्भावकतया रसपूर्णं च विद्यते।

ऋग्वेदीयेपुरुषसूक्ते एवं पठ्यते–

''नाभ्या आसीदन्तरिक्षं शीर्षो द्यौः समवर्तत।
पद्भ्यां भूमिर्दिशः श्रोत्रात् तथा लोकाँ अकल्पयन्।। '' ।।( ऋ. सं.१०/९०/१४) ।।

उद्यन्नद्य मित्रमह आरोहन्नुतरां दिवम्। हृद्रोगं मम सूर्य हरिमाणं च नाशय।। ऋ.सं. १/५०/११ ।।

यत्राऽस्य जगतस्त्रयो विभागाः स्वीकृता दृश्यन्ते। अन्तरिक्षंतावत् द्यावापृथिव्योन्तरालेतिष्ठति यद्यपि सूर्यो द्युलोकस्थानीयोऽग्निः दिवः परमेपदे तिष्ठति। यश्च हृदयरोगादि विनाशकः।

ऋग्वेदीयेमन्त्रे एवमपि पठ्यते–

(सूपर्णा एव आसते मध्य अरोधने दिवः।
ते सेधन्ति पथो वृकं तरन्तं यह्वतीरपो वित्तं मे अस्य रोदसी। ऋ.सं. १/१०५/११)

यत्रद्यावापृथिव्योरन्तरालेचन्द्रमसः स्थितिः। तदुपरिद्युलोके सूर्यस्थानम्। तद्उर्ध्वं च सूर्यस्य कक्षेति स्पष्टं ज्ञायते।[१]

---

[१] तुलनीयं भूमेःपिण्डशशाङ्करविकविकुजेज्याज्ञार्कि नक्षत्रकक्षाः। सू.सि./

## प्रथमा दृष्टिः।

सर्वेषां भुवनानां जातानां वा जीवाजीवानां आधारः सूर्य एवेति दरीदृश्यते।[२]

ऋग्वेदे समानांमास आकृति[३]रीतत्र संवत्सरस्य वर्षस्य वा समानार्थितया समा-शब्द पठ्यते। यद्यपि वर्षदिनानां संख्या ३६५ इति शतपथ ब्राह्मणे[४] स्पष्टं प्रदत्ता।

### वर्षः।

अत्र ऋग्वेदस्य मन्त्रद्वयं कृष्णयजुर्वेदस्य च मन्त्रानायोऽतिव रसप्रदं वर्तते सत्यस्याऽऽदित्यस्य[५] द्वादशारं चक्रं द्युलोकं परितः सततं भ्रमणशीलमपि नाशं न गच्छति। यत्र तत्पुत्राणां ७२० युग्मानि दिनरात्रिरुपाणि आरूढाणि सन्ति। इदं अपि प्रश्नरूपेण प्रस्तूयते यत् द्वादशपरिधियुक्तं चक्रमेकंनाभित्रय समन्वितमिति न कोऽपि जानामि। एत च संवत्सरनामधेयम्। तत्र च ३६० शंकव इव चलन्तअराः संलग्नाः सन्ति।[६]

### अयनविचारः।

तैत्तिरीयसंहितायां "तस्मादित्यः षण्मासो दक्षिणेनैति षडुत्तरेणे"ति (६/५/३) वचनबलेनेदं स्पष्टं ज्ञायते यद् यावत् कालपर्यन्तं सूर्यस्य स्थितिः विषुववृत्तस्य उत्तरे वा दक्षिणे वेति दृष्ट्वा उत्तरायणं दक्षिणामिति च द्वे अयने प्राप्यते।

### षड्ऋतवः।

तैत्तिरीयब्राह्मणे च "तस्य ते संवत्सरस्य वसन्तः शिरः। ग्रीष्मो दक्षिणः पक्षः। वर्षापुच्छं। शरदुत्तरः पक्षः। हेमन्तो मध्यमः" (३/१०/४/१) इति षड्तूनां गणना वैदिके काले वसन्तादारब्धा। अतः

वसन्तः (=मधुमाधवौ)

---

अत्रेदं प्रतिपत्तव्यं यत् कक्षाणामुपयुपरि स्थितिः एवं वर्तते-भूमिस्थपिण्डात् शशांकस्य (चन्द्रस्य) तद्ऊर्ध्वं रवेततश्च कवेः (शुक्रस्य) ततः कुजस्य (भौमस्य) ततइज्यस्य (पूजनीयस्य गुरोः) ततोऽपिज्ञस्य (बुधस्य) ततः अर्केः (शनिश्चरस्य) ततोऽन्ते च नक्षत्राणां स्पष्टिभवति।

[२] यत्रेमा विश्वाभुवनानि तस्थु। ऋ.सं. १/१६४/२ सूर्य आत्माजगतस्तस्थुश्च। ऋ.सं.

[३] ऋ.सं. १०/८५/५

[४] शत.ब्रा. २/२/३

[५] द्वादशारं न हि तज्जराय वर्वति चक्रं परिद्यामृतस्य। आ पुत्रा अग्ने मिथुनांसो अत्र सप्त शतानि विंशतिश्च तस्थुः।। ऋ.सं. १/१६४/११।।

[६] द्वादशप्रधयश्चक्रमेकं त्रीणि नभ्यानिक उमच्चिकेत।
तस्मिन्त्साकं त्रिशता न न शंकवोऽर्पिताः षष्टिर्न चलाचलासः।। ऋ.सं. १/१६४/४८।।

## प्रथमा दृष्टिः।

ग्रीष्मः (=शुक्रशुची)

वर्षा (=नभोनभस्यौ)

शरद् (=इषउर्जौ)

हेमन्तः (=सहः सहस्यौ)

शिशिरः (=तपस् तपस्यौ) चेति पूर्वं निगदितम्

ऋग्वेदीयपुरुषसूक्ते ''वसन्तोऽस्यासीदाज्यं ग्रीष्म इध्मः शरदहविरीति (१०/९०/६)।''

### सामवेदेऋतुवर्णनम्।

वा ५ संतः। ई ३ त्रू ३ रंतायाः। ग्रीष्मइन्नुरा१न्ती ३ याः। वर्षाण्यनुशा ३ हुं। रा ३ दाः। हेमन्तः शिशिरइन्नुरा २ ।न्तीयाउ। वा ३४५।।१२।। अथ सपूजनविधिरुद्रजपः पृ.११०।।

### मासविचारः।

वैदिकज्यौतषिशास्त्रानुसारेणमासगणनं त्रिविधं श्रूयते उपयुज्यते च। तद्यथा (१) सावनमासः सूर्योदयात् आरभ्य द्वितीयदिनस्य सूर्योदयः पर्यन्तस्य मानेन एकोदिवसः। तेषां त्रिंशत् दिवसानां मासः एव सावनमासः। सावनशब्दस्य प्रातःसवनादिषु पठितात् सोमयागान्तर्गत-सवनशब्दात् सवनस्येदं सावनमिति कालमाधवकारेण ''सावनशब्दोऽहोरात्रोपलक्षकः सोमयागे सवनत्रयस्याहोरात्र सम्पाद्यत्वात्'' इति। तत्र तत्रैकमहोरात्रं चाऽहः कथ्यते तेषां षड्दिनानि षड्ऽहः पञ्च च षड्ऽहः एकोमासः इति। (२) चान्द्रमासस्यगणनं द्विविधं पूर्णिमान्तं अमान्तञ्च भारतस्य विविधेषु प्रदेशेषु गण्यते तथापि प्रत्येकस्मिन् चान्द्रमासे ३० तिथयः संभवन्ति। सूर्यचन्द्रयोर्द्वादशांसात्मकः कालः तिथिरित्युच्यते। (३) वैदिकज्योतिषि भ-चक्राधारिते सौरमासगणने यद्यपि सौरमासनामानि नैव प्राप्यन्ते तथापि एकवर्षवितस्य भचक्रस्य द्वादशभागान्तं प्रत्येकं मासः एक इति ज्ञायते परवर्तिज्योतिषि सौरमासस्य गणनम् सूर्यस्य एकस्मिन् राशौ यावन् भोगकालस्तस्यमानं संक्रान्तिरीति यत् कथ्यते तदेव सौरमासः। वैदिकज्योतिषि नक्षत्रवर्षमानं बार्हस्पत्यमानं च यद्यपि न दृश्येते आधुनिके तु ज्योतिषशास्त्रे तदनुसारं गणनादिकं बहुषः प्राप्यते।

यजुर्वेदस्य वाजसनेयिसंहितायां तैत्तिरीयसंहितायां चैवं पठ्यते

मधवे स्वाहा माधवाय स्वाहा शुक्रायस्वाहा शुचये स्वाहा

नभसे स्वाहा नभस्याय स्वाहोषाय स्वाहोर्जाय स्वाहा सहसे स्वाहा

## प्रथमा दृष्टिः।

सहस्याय स्वाहा तपसे स्वाहा तपस्याय स्वाहा॑ँहसपतये स्वाहा[७]।

मधुश्च माधवश्च वासन्तिकावृतू शुक्रश्च शुचिश्च ग्रैष्मावृतू नभश्च नभस्यश्च वार्षिकावृतू इषश्चोर्जश्च शरदावृतू सहश्च सहस्यश्च हैमान्तिकावृतू तपश्च तपस्यश्च शैशिरावृतू[८]।

मधुश्च माधवश्च शुक्रश्च शुचिश्च नभश्च नभस्यश्चेषश्चोर्जश्च सहश्च सहस्यश्च तपश्च तपस्यश्चोपयामगृहीतोसि॑ँस सर्पोस्य॑ँहस्पत्याय त्वा[९]।

अरुणोरुणरजाः पुण्डरीको विश्वजिदभिजित्। आर्द्रः पिन्वमानोन्नवान् रसवानिरावान्। सर्वौषधः सम्भरो सहस्वान्[१०]।

त्रयोदशनामान्यपि प्राप्यन्ते। किन्तु तान्यत्रप्रचलितानि।

ते च चान्द्रमासा इति निर्विवादमेव यतो मास शब्दस्य अर्थश्चन्द्र एव। अतस्तेषां नामानि मधु र्माधवः शुक्रः, शुचिर्नभो नभस्य इष उर्जः सहः सहस्य[११] तपस्तपस्यश्च एतदपि स्पष्टं यत् वैदिककाले चैत्रारंभी वर्षः आसित् यस्य परंपरा शकसंवति विद्यामानाऽस्ति।

वैदिकमासानामाधुनिकनामानित्रृतश्च अधोनिर्दिष्टेकोष्टके स्पष्टं भवति।

| क्रमाङ्कः | वैदिकम्। | आधुनिकम्। | ऋतुः। |
|---|---|---|---|
| १ | मधुः।[१२] | चैत्रः। | वसन्तः। |
| २ | माधवः। | वैशाखः। | वसन्तः। |
| ३ | शुक्रः। | ज्येष्ठः। | ग्रीष्मः। |

[७] शु.य.म.व.सं. २२/३१

[८] तै.सं. ४/४/११

[९] तै.सं. १/४/१४

[१०] तै.ब्रा. ३/१०/१

[११] कुमारसंभवे कालिदासः ''सहस्य रात्रीरुदेवासतत्परा'' (५/२६)

[१२] वैदिककाले वसन्तसम्पातश्चैत्र एवाधुनिकेतु फाल्गुनमासे दृश्यते। एतद् क्रमेणैव सर्वेषामृतूनां संपाताः ज्ञेयाः।

## प्रथमा दृष्टिः।

| | | | |
|---|---|---|---|
| ४ | शुचिः। | आषाढः।[१३] | ग्रीष्मः। |
| ५ | नभः। | श्रावणः। | वर्षा। |
| ६ | नभस्य। | भाद्रपदः। | वर्षा। |
| ७ | इषः। | अश्विनः। | शरद्। |
| ८ | उर्जः। | कार्तिकः। | शरद्। |
| ९ | सहः। | मार्गशीर्षः। | हेमन्तः। |
| १० | सहस्य।[१४] | पौषः। | हेमन्तः। |
| ११ | तपः। | माघः। | शिशिरः। |
| १२ | तपस्यः। | फाल्गुनः। | शिशिरः। |
| १३ | संसर्पः। | अधिकमासो वा पुरुषोत्तमो वा मलमासो वा। | – |

वैदिककालानन्तरं मधुमाधवादिमासानां चैत्रवैशाखादिनामानि प्रचलितानि जातानि तत्रेदमश्यमन्तव्यं यद् यस्यां पौढामास्या चन्द्रस्य यस्मिन्नेवनक्षत्रेमुपस्थितिर्भवेत् तन्नक्षत्रस्य नामानुसारेण तन्नक्षत्र सम्बन्धी चन्द्रस्य पूर्णमासः इति व्युत्पत्या चित्रानक्षत्रे उपस्थितस्य चन्द्रस्य अस्तित्वे चैत्रीपूर्णिमा पौर्णमासी वा प्रख्याता जाता। तदनुसारेण विशाखानक्षत्रे चन्द्रस्योपस्थितित्वे वैशाखी पौर्णमासी। एवमन्यत्र प्रतिपत्तव्य।

### अर्धमासविचारः।

अर्धमासाः[१५] इति एकस्मिन् वर्षे चतुर्विंशति संख्याका भवन्ति। एतेषां अपि पक्षा इति नामान्तरम्। प्रत्येकस्मिन् मासे शुक्लकृष्णाविति पक्षद्वयम् अर्धमासौ वा। तत्र प्रतिपदादारभ्य पूर्णिमापर्यन्तानां दिवसानां शुक्लपक्ष इति नामकरणम्। पूर्णिमानन्तरं प्रतिपदातारभ्य अमावास्यान्तानां दिवसानां कृष्णपक्ष इति नामकरणम्। भारते पूर्णीमान्तोमासः अमावास्यान्तोमासश्चेत्युभयम् स्वीकृत्य मासगणना प्राप्यते।[१६]

### तिथिः।

तैत्तिरीयब्राह्मणे (१/५/१०) एवं पठ्यते "चन्द्रमा वै पञ्चदशः। एष हि पञ्चदशामपक्षीयते। पञ्चदश्यामापूर्यते" इति श्रुतेः चन्द्रमसः पञ्चदशदिनपर्यन्तम् अपक्षयः आपूर्तिश्च अमावास्या च पूर्णिमा

[१३] आषाढमासस्य ऋतुसंपातः ग्रीष्मात् वर्षायां चलितोऽत एव कालिदासः कथयति–आषाढस्य प्रथमे दिवसे मेघमाश्लिष्टसानुम्। (मेघ. २)

[१४] कुमारसंभवे कालिदासः– "सहस्य रात्रीरुदेवासतत्परा" (५/२६)

[१५] ज्योतिर्विद-शङ्कर-बालकृष्ण-दीक्षितमहोयदयेन स्वकीये भारतीयज्योतिषेत्याख्ये ग्रन्थे ४९ त्तमे पृष्ठे पवित्रन् पवियिष्यन् पूत इति चतुर्विंशति नामान्यर्धमासानां परिगणितानि।

[१६] बर्हिषा पूर्णमासे व्रतमुपैति वत्सैरमावास्याम् (तै.सं.१/६/७)

चेति प्राप्यते। समग्राणां तिथीनां अन्तरभेदेन तिभिभेदो वैदिकज्यौतिषि अस्पष्ट एव। परवर्तिज्यौतिषि तिथिमानमेवं यत्रसूर्यचन्द्रयोर्मध्ये द्वादशांशान्तर तिथिरेका । यद्यपि बहवृचब्राह्मणे एतादृशी स्पष्टता दृश्यते यत्–''यां पर्यस्तमियादभ्युदियादिति सा तिथिः तेन चन्द्रस्यैव उदयास्त पर्यन्त कालस्तिभिरेका'' इति प्राप्यते।

## अहोरात्रम्।

तैत्तिरीयब्राह्मणे (३/१०/१/१, ३/१०/१/२) शुक्लकृष्णपक्षयोः दिनानां रात्रीणां च संज्ञाः अधोलिखितप्रकारेण प्रदत्ताः। तदेतत् कोष्टकानुसारेण प्रस्तूयते।

| दिनसंज्ञाः। | | | रात्रीसंज्ञाः। | | |
|---|---|---|---|---|---|
| क्रमाङ्कः | शुक्लपक्षः | कृष्णपक्षः | क्रमाङ्कः | शुक्लपक्षः | कृष्णपक्षः |
| १ | संज्ञानम्। | प्रस्तुतम्। | १ | दर्शा। | सुता। |
| २ | विज्ञानम्। | विष्टुतम्। | २ | दृष्टा। | सुन्वनी। |
| ३ | प्रज्ञानम्। | संस्तुतम्। | ३ | दर्शता। | प्रसुता। |
| ४ | जानत्। | कल्याणम्। | ४ | विश्वरूपा। | सूयमाना। |
| ५ | अभिजानत। | विश्वरूपम्। | ५ | सुदर्शना। | अभीषूयमाणा। |
| ६ | संकल्पमानम्। | शुक्रम्। | ६ | आप्यमाना। | पीति। |
| ७ | प्रकल्पमानम्। | अमृतम्। | ७ | प्यायमाना। | प्रपा। |
| ८ | उपकल्पमानम्। | तेजस्वि। | ८ | प्याया। | सम्पा। |
| ९ | उपक्लृप्तम्। | तेजः। | ९ | सूनृता। | तृप्तिः। |
| १० | क्लृप्तम्। | समृद्धम्। | १० | इरा। | तर्पयन्ती। |
| ११ | श्रेयः। | अरुणम्। | ११ | आपूर्यमाणा। | कान्ता |
| १२ | अवसीयः। | भानुमत्। | १२ | पूर्यमाणा। | काम्या। |
| १३ | आयत्। | मरिचिमत्। | १३ | पूरयन्ति। | कामजाता। |
| १४ | सम्भूतम्। | अभितपत्। | १४ | पूर्णा। | आयुष्मती। |
| १५ | भूतम्। | तपस्वत्। | १५ | पौर्णमासी। | कामदुघा। |

## दिनभागाः।

सूर्योदयादारभ्य सूर्यास्तपर्यन्त कालस्य दिनस्येति यावत् तस्य पूर्वाह्ण पराह्ण नामानौ द्वौभागौ स्वाभाविकौ, पूर्वाह्णमध्याह्न अपराह्ण नामानस्त्रयो विभागाः [१७] पूर्वाह्णमध्याह्नापराह्णसायाह्ननामानश्चत्वारो विभागाः[१८] पञ्चविभागाः प्रातःसंगवमध्याह्नापराह्णसायमित्याख्या विभागाः [१९]।

[१७] शत.ब्रा. २/४/२/८

## प्रथमा दृष्टिः।

### सूर्यचन्द्रसम्बधः।

सूर्यस्वप्रकाशितश्चन्द्रः परप्रकाशितः सूर्योप्रकाशितोवेति वैदिकज्योतिषि स्पष्टं प्राप्यते [20] । सूर्यरश्मिश्चन्द्रमागन्धर्वः यत्र चन्द्रमसः सूर्यरश्मिरिति निर्देशः चन्द्रस्य परप्रकाशित्वं प्रगटयति। अपरं चैतरीयब्राह्मणे (४०/५) चन्द्रमा अमावास्या मादित्यमनुप्रविशति इत्यानुसारेणाऽमावास्यायां सूर्यचन्द्रयोः समकालीनास्थितिः पठ्यते।

### वासरः।

रविचन्द्रभौमबुधबृहस्पतिशुक्रशनैश्चरादिनां वाराणां नामानि वैदिकसाहित्ये नोल्लिखीतानि न दृश्यन्ते तथापि वारशब्दाऽर्थे वासरशब्दस्य प्रयोगो बहुषो दृश्यते।

### मुहूर्तानि।

मुहूर्तानां कालमान नामानि च सर्वप्रथमं तैत्तिरीयब्राह्मणे (३/१०/९, ३/१०/१/१,२) पठ्यन्ते यत्र दिनमानस्य द्वादशघंटानां (षष्ठीर्घट्यः)पञ्चदशसंख्याभागाकारेण ४८ मिनिटाः(चस्रोःघट्यः) प्राप्यन्ते तथैव रात्रेरपि पञ्चदशमुहूर्तानि।[21] दिनमुहूर्तानि तावत् (शुक्लपक्षस्य) (१) चित्रः (२) केतुः (३) दाता (४) प्रदाता (५) सविता (६) प्रसविता (७) अभिशास्ता (८) अनुमन्त्रमेति सन्ति।

अपरत्र (तै.ब्रा. ३/१०/१) मुहूर्तनामानि। (१) चित्र (२) केतुः (३) प्रभात् (४) आभान् (५) संभान् (६) ज्योतिस्मान् (७) स्तेजस्वान् (८) आतपन् (९) तपन् (१०) अभितपन् (११) रोचनः (१२) रोचमानः (१३) शोभनः (१४) शोभमानः (१५) कल्याणः च प्रदत्तानि।

तत्रैव (तै.ब्रा. ३/१०/१/१,२) शुक्लपक्षस्य रात्रिमुहूर्तानि (१) दाता (२) प्रदाता (३) आनन्दः (४) मोदः (५) प्रमोदः (६) आवेशन् (७) निवेशयन् (८) संवेशनः (९) संशान्तः (१०) शान्तः (११) आभवन् (१२) प्रभवन् (१३) सम्भवन् (१४) संभूतः (१५) भूतः च प्रदत्तानि सन्ति।

---

[18] अर्थ.सं. ९/६/४६

[19] ऋ.सं. ५/७६/३

[20] तै.सं. ३/४/७/१

[21] मुहूर्तचिन्तामणिकाराः दिनमानस्य द्वादशघण्टानां (षष्ठीर्घट्यः) षोडशसंख्ययाभागाकारेण ४५ मिनिटाः स्वीकुर्वन्ति। (शुभाशुभप्रकरणम् पृ.४५)

## प्रथमा दृष्टिः।

कृष्णपक्षस्य दिनमुहूर्तानां नामनि तैत्तिरीयब्राह्मणे (३/१०/१/२) (१) सविता (२) प्रसविता (३) दीप्तः (४) दीपयन् (५) दीप्यमानः (६) ज्वलन् (७) ज्वलिता (८) तपन् (९) वितपन् (१०) संतपन् (११) रोचनः (१२) रोचमानः (१३) शंभूः (१४) शुंभमानः (१५) वाम च प्रदत्तानि।

अपरत्र (तै.ब्रा. ३/१०/१/३) कृष्णपक्षस्य रात्रिमुहूर्तानि
(१) अभिशास्ता (२) अनमन्ता (३) आनन्दः (४) मोदः (५) प्रमोदः (६) आसादयन् (७) निषादयन् (८) संसादनः (९) संशान्त (१०) शान्तः (११) आभूः (१२) विभूः (१३) प्रभूः (१४) शंभूः (१५) भुजः च प्रदत्तानि सन्ति।

आधुनिकेकाले मुहूर्तानां प्रसिद्धनामान्येवम् प्राप्यन्ते तद्यथा (१) शिव (२) सार्पः (३) मित्रः (४) पितृदेवः (५) वसुः (६) अम्बुः (७) विश्वेदेवा (८) अभिजित् (९) ब्रह्मा (१०) इन्द्रः (११) इनद्रग्नी (१२) निशाचरः (१३) जलाधीशः (१४) अर्यमा (१५) भगश्चेति सन्ति।

रात्रिमुहूर्तानां नामानि (१) शिव (२) अजैकपाद (३) आहिर्बुध्नयः (४) पूषा (५) दस्रौ (६) यमः (७) अग्निः (८) ब्रह्मा (९) सोमः (१०) अदितिः (११) बृहस्पतिः (१२) विष्णुः (१३) सूर्यः (१४) त्वष्टा (विश्वकर्मा) (१५) वायुश्चति सन्ति।[२२]

### नक्षत्राणि।

अपत्ये तावयो? (ऋ.सं. १/५०/२) इत्यत्र अभिश्यावमि (ऋ.सं. १०/६८/११) त्यत्र च सुस्पष्टतया कार्यानुरुपभाजिनः तारकानां समूहः नक्षत्रमिति संज्ञामुद्वहन्ति इति वेदकालात् नक्षत्रस्वरूपविषये पूर्णं ज्ञानं भारतीयज्यौतिषस्य वर्तते।

---

२२ अह्नः स्युः शिवसार्पमित्रपितरोवस्वंबु विश्वोभिजित्।
केन्द्रेंद्राग्निनिशाचराअपिजलधीशोर्यमाख्योभगः।।
रात्रेः स्युः स्मरहात्रयोजचरणात्पंचाश्वितोथोदिति।
जीवोविष्णुरिनास्त्रस्तिथिलवाः कर्मेषु भोक्तं स्मृतम्।। मुहूर्तमार्तंड २/४।।

## प्रथमा दृष्टिः।

प्रतिचिह्ननक्षत्राणां नामानि ऋग्वेदे रक्षितानि दृश्यन्ते। तद्यथा। तिस्य(ऋ.सं. ५/५४/१३, १०/६४/८) पुष्य ऋ.सं.

संहितोक्तानि नक्षत्रणि तैत्तिरीय (तै.सं ४/४/१०)

| क्रमाङ्कः | नक्षत्रनाम | देवता | लिङ्गम् | तारासंख्या[२३] |
|---|---|---|---|---|
| १ | कृत्तिका।[२४] | अग्निः। | स्त्री. | ०६ |
| २ | रोहिणी। | प्रजापतिः। | स्त्री. | ०५ |
| ३ | मृगशीर्षम् १,३,४ | सोमः। | नपुं. | ०३ |
| | (इन्वका २) | (सोमः)। | (स्त्री.) | (०३) |
| ४ | आर्द्रा १,३,४ | रुद्रः। | स्त्री. | ०१ |
| | (बाहू २) | (रुद्रः)। | (पुं.) | ०१ |
| ५ | पुनर्वसुः। | अदितिः। | पुं. | ०४ |
| ६ | तिष्यः। | बृहस्पतिः। | पुं. | ०३ |
| ७ | आश्लेषा। | सर्पः। | स्त्री. | ०५ |
| ८ | मघा। | पितरः। | स्त्री. | ०५ |
| ९ | फाल्गुनी। १,३,४ | अर्यमा। | स्त्री. | ०२ |
| | (पूर्वाफाल्गुनी २) | (अर्यमा) | (स्त्री.) | (०२) |
| १० | फालगुनी। १,३,४ | भगः। | स्त्री. | ०२ |
| | (उत्तराफाल्गुनी २) | (भगः।) | (स्त्री.) | (०२) |
| ११ | हस्तः। | सविता। | पुं. | ०५ |
| १२ | चित्रा। | इन्द्रः १,२ | स्त्री. | ०१ |
| | | (त्वष्टा ३,४) | | |
| १३ | स्वातिः १ | वायुः। | स्त्री. | ०१ |
| | (निष्ट्या २,३,४) | (वायुः।) | (स्त्री.) | (०१) |
| १४ | विशाखा। | इन्द्राग्नी। | स्त्री. | ०४ |
| १५ | अनुराधा। | मित्रः। | स्त्री. | ०४ |
| १६ | रोहिणी १,२ | इन्द्रः। | स्त्री. | ०३ |
| | (ज्येष्ठा ३,४) | (इन्द्रः।) | (स्त्री.) | (०३) |

[२३] मुहूर्तचिन्तामणिक्रमोऽत्र गृहीतः तै.ब्रा. केवलमेकवचनबहुवचनेति निर्देशात्।

[२४] प्रचलितपाठानुसारं कृत्तिकायाः तृतीयः क्रमः गृह्यते।

| | | | | |
|---|---|---|---|---|
| १७ | विचृतौ। १ | पितरः। | पुं. | १९ |
| | (मूलबर्हषी २) | (निर्ऋतिः) | (स्त्री.) | (११) |
| | (मूलम्) | (निर्ऋतिः) | (नपुं.) | (११) |
| | (मूलम्) | (प्रजापतिः।) | (नपुं.) | (११) |
| १८ | आषाढा। १,३,४ | आपः। | स्त्री. | ०२ |
| | (पूर्वाषाढा २) | आपः। | स्त्री. | (०२) |
| १९ | आषाढा। १,३,४ | विश्वेदेवाः। | स्त्री. | ०२ |
| | (उत्तराषाढा २) | (विश्वेदेवाः।) | (स्त्री.) | (०२) |
| | अभिजित् ३,४ | ब्रह्मा। | नपुं. | ०३ |
| २० | श्रोणा। | विष्णुः। | स्त्री. | ०३ |
| २१ | श्रविष्ठा। | वसवः। | स्त्री. | ०४ |
| २२ | शतभिषक्। | इन्द्रः १,२ | पुं. | १०० |
| | | (वरुणो वा) | (पुं.) | (१००) |
| २३ | प्रोष्ठपदः १,३,४ | अजैकपादः। | पुं. | ०२ |
| | (पूर्वपौष्ठपदः २) | (अजैकपादः।) | (पुं.) | (०२) |
| २४ | प्रोष्ठपदः १,३,४ | अहिर्बुध्नियः। | पुं. | ०३ |
| | (उत्तरपौष्ठपदः २) | (अहिर्बुध्नियः।) | (पुं.) | (०३) |
| २५ | रेवती। | पूषा। | स्त्री. | ३२ |
| २६ | अश्वयुजः। | अश्विनौ। | स्त्री. | ०३ |
| २७ | अपभरणी। | यमः। | स्त्री. | ०३ |

एतेषा ५,६,११,१७,२२,२३,२४,इत्यादीनि पुंनक्षत्राणि। १,२,४,७,८,९,१०,१२,१३,१४,१५, १६,१८,१९,२०, २१,२५,२६,२७ इत्यादीनि स्त्रीनक्षत्राणि तथा ३३ त्यस्य नपुंसकलिङ्गम्।

## ग्रहणानि।

ताण्ड्यब्राह्मणे (४/५/२) गोपथब्राह्मणे(८/१९) शतपथब्राह्मणे (५/३/२२) च ग्रहणोल्लेखाः प्राप्यन्ते यद्यपि वैदिककाले ग्रहणविषयकं भयं नासीत।

## ग्रहाः।

गृह्णातीतिग्रहः इति व्युत्पत्त्यनुसारेण ग्रहाणां प्रभावः सुस्पष्टो भवति। अत एवोक्तम्– ग्रहाराज्यप्रयच्छन्ति ग्रहाराज्यं हरन्ति च ग्रहैस्तु व्यापितं सर्वं त्रैलोक्यं सचराचरम्।

## प्रथमा दृष्टिः।

अमी ये पञ्चोक्षणोमध्ये तस्थुर्महोदिवः। देवत्रानु प्रावच्यं सध्रीचीनानि वावृतुर्वित्तं मे अश्य रोदसी (ऋ. १/१०५/१०) इत्यस्मिन्मन्त्रे पञ्च संख्योल्लेखन भौम-बुध-बृहस्पति-शुक्र-शनैश्चराणां ग्रहणं सर्वैः स्वीकृतं वर्तते। तत्र सूर्याचन्द्रमसाविति सूर्यस्य चन्द्रस्य चान्तर्गणेन ग्रहाणां संख्यासप्तैवासन्न। यद्यपि याज्ञवल्क्यस्मृत्यां नवग्रहाणां नमोल्लेखः प्राप्यन्ते ।

सूर्यः सोमो महीपुत्रः सोमपुत्रो बृहस्पतिः।
शुक्रः शनैश्चरो राहुः केतुश्चैते ग्रहाः स्मृताः।।।। याज्ञवल्क्यस्मृतिः आचाराध्यायः/३९५।।

वेदाङ्गज्योतिषम्।

शिक्षा कल्पो व्याकरणं छन्दसां चयः।
ज्योतिषामयनं चैव वेदाङ्गानि षडेव तु।।

इत्यत्र परिगणितेषु षट्सुवेदाङ्गेषु ज्यौतिषवेदाङ्गस्य यत् नाम पठ्यन्ते तद् विषयकं लगधाचार्यस्य-वेदाङ्गज्यौतिषमिति नामना षट्त्रिंशत् श्लोकयुक्तः ग्रन्थः प्राप्यते इति बालशङ्कर स्वकीये भारतीयज्यौतिषशास्त्रेतिहास इति ग्रन्थे (पृ. ९४) निर्देशः कृतास्ति।

''कालज्ञानं प्रवक्ष्यामि लगधस्य महात्मनः।। ऋग्वेदज्यौतिषम्-२।।''

संवत्सरम्।

वेदकालीनज्यौतिषग्रन्थेषु भिन्नभिन्नानि पञ्चसंवत्सरनामानि प्राप्यन्ते तानि च (१) संवत्सरम् (२) परिवत्सरम्, (३) इदावत्सरम्, (४) अनुवत्सरम्, (५) इद्वत्सरम् च। तत्र संवत्सरे माघशुक्लप्रतिपदा धनिष्ठानक्षत्रयुक्ते समये उत्तरायणप्रारम्भः कथितः। परिवत्सरनामके संवत्सरे माघशुक्लत्रयोदश्यां सौरधनिष्ठानक्षत्रे चान्द्रे च आर्द्रानक्षत्रे उत्तरायणप्रारम्भः दर्शितः। अनुवत्सरनामकेसंवत्सरे माघशुक्लसप्तम्यां सौरे धनिष्ठानक्षत्रे चान्द्रे चाश्विनी नक्षत्रे। उत्तरायणप्रारम्भः कथितः उद्वत्सरनामके संवत्सरे माघकृष्णचतुर्थ्यां सौरे धनिष्ठानक्षत्रे चान्द्रे चोत्तफाल्गुनीनक्षत्रे उक्तः। दक्षिणायनारम्भस्तु संवत्सरनामके संवत्सरे श्रावणशुक्लसप्तम्यां सौरे आश्लेषार्धनक्षत्रे चान्द्रे च्चित्रानक्षत्रे परिवत्सरनामके संवत्सरे श्रावणकृष्णचतुर्थ्यां सौरे आश्लेषार्धनक्षत्रे चान्द्रे च पूर्वाभाद्रपदानक्षत्रे, इदावत्सरनामके संवत्सरे श्रावणशुक्लप्रतिपदि सौरे आश्लेषार्धनक्षत्रे चान्द्रे चाऽश्लेषनक्षत्रे

## प्रथमा दृष्टिः।

अनुवत्सरनामके संवत्सरे श्रावणशुक्लत्रयोदश्यां सौरे आश्लेषार्धनक्षत्रे चान्द्र च पूर्वाषाढानक्षत्रे इद्वत्सरनामके संवत्सरे श्रावणकृष्णदशम्यां सौरे आश्लेषार्धनक्षत्रे चान्द्रे च रोहिणीनक्षत्रे निगदितः।

संवत्सरकोष्टकम्।

| **क्रमांकः** | **संवत्सरनामानि** | **तैत्तिरीय-ब्राह्मणोक्तनामानि** | **गर्गोक्तनामानि** | **वराहोक्तनामानि** |
|---|---|---|---|---|
| १ | संवत्सरम्। | अग्निः। | अग्निः। | अग्निः। |
| २ | परिवत्सरम्। | आदित्यः। | आदित्यः। | आदित्यः। |
| ३ | इदावत्सरम्। | चन्द्रमाः। | वायुः। | चन्द्रमाः। |
| ४ | अनुवत्सरम्। | वायुः। | चन्द्रमाः। | प्रजापतिः। |
| ५ | इद्वत्सरम्। | — | मृत्युः। | रुद्रः। |

### ग्रहगतिः।

वेदाङ्गज्योतिषे सूर्यगतिश्चंद्रगतिश्चमध्यम-गतित्येन प्रस्तुते। तत्र भौमाबुधबृहस्पत्यादिनामन्यग्रहाणां विषये निर्देशोऽपि न प्राप्यते। अतश्चेतेषां गतिस्वरूपादिकं न ज्ञायते।

### ग्रहयुतिः।

प्रायश्चित्ताध्याये ग्रहसंयोगजैः फलैरिति [२५] संदर्भः तत्कालीनसमाजे ग्रहाणां परस्परयुतिसम्बधितं फलविषयकं ज्ञानं बोधयति

### वर्षम्।

वेदाङ्गज्योतिषे संवत्सरवर्षमब्दश्चेति संज्ञात्रयमेव प्राप्यते।

---

[२५] याज्ञवल्क्यस्मृति -१७१ मन्त्र)

## प्रथमा दृष्टि:।

### मास:।

वेदाङ्गज्यौतिषे आमावास्यान्तो मास: आसीदित स्पष्टमेव। तत्र पूर्णिमान्तमासान्तमारम्भो कुत्रचिदपि न दृश्यते।

### मुहूर्तनामानि।

अथर्वज्योतिषे अहोरात्र पञ्चदशैव मुहूर्ता: गृहीता। वेदाङ्गाज्यौतिषे मुहूर्तानां औष्टौनामानि प्रदत्तानि येषु अभिजिदाख्यस्य अष्टमस्य पश्चात् पूर्वङ्गनानां सप्तानां पुनर्ग्रहणात् पञ्चदशमुहूर्तानि। नामानि च

रौद्रं श्वेतं मैत्रं सारभट्टं सावित्रं वैराजं विश्वावसु अभीजिच्चेति।

### वासरनामानि।

अर्थवेदज्यौतिषे सप्तवासरनामानि पठ्यन्ते। तद्यथा

आदित्य: सोमो भौमश्च तथा बुधबृहस्पती।
भार्गव: शनैश्चरस्यैव एते सप्त दिनाधिपा:।।

(१) आदित्य: (रविवासर:) (२) सोमवासर: (३)भौमवासर: (मंगलवासर:) (४) बुधवासर: (५) बृहस्पतीवासर: (गुरुवासर:) (६) भार्गववासर: (भृगुवासर–शुक्रवासर:) (७) शनैश्चरश्च।

### चन्द्रबलम् / ताराबलम्।

अथर्वज्योतिर्नामके वेदाङ्गग्रन्थे यद्यपि तिथिरेकगुणा प्रोक्ता......

इति संदर्शितं तथापि यत्र कृष्णपक्षाष्टमीत: शुक्लपक्षपञ्चमीपर्यन्तं चन्द्रबलं न प्राप्यते तत्र ताराबलम् अपरनाम नक्षत्रबलं गणनायां गृह्यते। तस्यैतस्य जातकस्य स्वजन्मन: चन्द्रस्य नक्षत्रादारभ्य सप्तविंशतिनक्षत्राणां प्रथमस्य जन्मेतिर्नामदशमस्य कर्मेतिनाम एकोनविंशस्य चाधानमिति नामकरणं कृत्वा शेषाणां द्वितीयादारभ्य नवमपर्यन्तमेकदशत: एकोनविंशति पर्यन्तम् विंशत्यारभ्य च सप्तविंशति पर्यन्तं क्रमेण

(१) सम्पतकरं (२) विपत्करं (३) क्षेम्यं (४) प्रत्यरं (५) साधकं (६) नैधनं (७) मैत्रं (८) परममैत्रमिति[२६] नामानि।

---

[२६] जन्माख्यसम्पद्विपद: क्षेमप्रत्यरिसाधका:।
वधमैत्रातिमैत्रा: स्युस्तारा: नामसदृक्फला:।। १२।। ।मु.चि.४ /१२।।

## प्रथमा दृष्टिः।

### व्याकरणग्रन्थेषु ज्यौतिषम्।

पाणिनिविरचियातामष्टाध्यायां वर्ष (पाणि.सू. ५/१/८८,७/३१६) हायन (४/१/२७, ५/९/१३०) दिनविभागे (३/३/९) त्यादिनां सन्दर्भाः पाणिनेः समये (६०० ख्रिस्ताब्दम्) ज्यौतिषस्य न केवलं सम्पूर्णं ज्ञानमपितु तस्य दृष्ठं स्तम्भबन्धं प्रतिपादयति।

### युगपद्धति।[२७]

भगवानमनुः प्रथमाध्याये युगविषयकान् यान् सिद्धान्तान् प्रस्थापयति तानेव सिद्धान्तानन्ये स्मृतिकारः पुराणकारश्च प्रायः विनापरिवर्तनं प्रस्थापयन्ति ते पुनरेवं प्रस्थापिता।

ब्रह्मास्य तु क्षपाहस्य यत्प्रमाणं समासतः।
एकैकशो युगानां तु क्रमशस्तन्निबोधत।। ६८।।
यत्वार्याहूः सहस्राणि वर्षाणां तत्कृतं युगम्।
तस्य तावच्छती सन्ध्या सन्ध्यांशश्च तथाविधः।। ६९।।
इतरेषु ससन्धेषु ससन्ध्यांशेषु च त्रिषु।
एकोपायेन वर्तन्ते सहस्राणि शतानि च।। ७०।।
यदेतत्परिसंख्यातमादावेव चतुर्युगम्।
एतद्वादशसाहस्रं देवानां युगमुच्यते।। ७१।।
दैविकानां युगानान्तु सहस्रपरिसंख्यया।
ब्राह्ममेकमहर्ज्ञेयं तावतीं रात्रिमेव च।। ७२।।
तद्वै युगसहस्रान्तं ब्राह्मं पुण्यमहर्विदुः।
रात्रिञ्च तावतीमेव तेऽहोरात्रविदीजनाः।। ७३।।
तस्य सोऽहर्निशस्यान्ते प्रसुप्तः प्रति बुध्यते।
प्रतिबुद्धश्च सृजति मनस्सदसदात्मकम्।। ७४।।
मनः सृष्टिं विकुरुते चोद्यमानं सिसृक्षया।
आकाशं जायते तस्मात्तस्य शब्दं गुणं विदुः।। ७५।।
आकाशात्तु विकुर्वाणात् सवेगन्धवहः शुचिः।
बलवाञ्जायते वायुः स वै स्पर्शगुणो मतः।। ७६।।

---

[२७] भा.ज्यो.पृ.१४५।

## प्रथमा दृष्टि:।

वायोरपि विकुर्वाणात् वरोचिष्णु तमोनुदम्।
ज्योतिरुत्पद्यते भास्वत्तद्रूपगुणमुच्यते।। ७७।।
ज्योतिषश्च विकुर्वाणादापो रसगुणा: स्मृता:।
अद्भ्यो गन्धगुणो भूमिरित्येषा सृष्टिरादित:।। ७८।।
यत् प्राक् द्वादशसाहस्रमुदितं दैविकं युगम्।
तदेक सप्ततिगुणं मन्वन्तरमिहोच्यते।। ७९।।
मन्वन्तराण्यसंख्यानि सर्ग: संहार एव च।
क्रीडान्निवैतत् कुरुते परमेष्ठी पुन: पुन:।। ८०।।
चतुष्पात् सकलो धर्म: सत्यञ्चैव कृते युगे।
नाधर्मेणागम: कश्चित् मनुष्यान्प्रतिवर्तते।। ८१।।
इतरेष्वागमाद्धर्म: पादशस्त्ववरोपित:।
चौरिकानृतमायभिर्धर्मश्चापैति पादश:।। ८२।।
अरोगा: सर्वसिद्धार्थाश्चतुर्वर्षशतायुष:।
कृते त्रेतादिषु ह्येषामायुर्ह्रसति पादृश:।। ८३।।
वेदोक्तमायुर्मर्त्यानामाशिषश्चैव कर्मणाम्।
फलन्त्यनुयुगं लोके प्रभावश्च शरीरिणाम्।। ८४।।
अन्ये कृतेयुगे धर्मास्त्रेतायां द्वापरे परे।
अन्ये कलियुगे नृणां युह्रसानुरूपत:।। ८५।।
तप: परं कृतयुगे त्रेतायां ज्ञानमुच्यते।
द्वापरे यज्ञमेवाहुदनिमेकं कलौ युगे।। ८६।।

निम्नलिखित कोष्ठकात् सर्वमेतत् स्पष्टं भविष्यति।

| **युगनाम।** | **संध्या।** | **मुख्यकाल।** | **संध्याश:।** |
|---|---|---|---|
| कृत:। | ४०० | ४००० | ४००=४८०० |
| त्रेता। | ३०० | ३००० | ३००=३६०० |
| द्वापर। | २०० | २००० | १००=२४०० |
| कलि:। | १०० | १००० | १००=१२०० |

सूर्यसिद्धान्ताख्यग्रन्थे सूर्यस्य मयदानवेनाऽऽर्षः संवादो वर्तते। यत्र संवत्सरस्य मेषवृषभादि-राशयनुक्रमेण द्वादश सौरमासाः परिगणिता। तत्र च षष्ट्युत्तशतत्रयदिवसा वर्षमेकमिति गण्यते। इदं तु मानुषंवर्ष यस्यैकस्यमानं देवानां असुराणां च अहोरात्रम् । उत्तरायणे च सूर्ये देवतानामहासुराणां तु रात्रयः। दक्षिणायने सूर्ये देवानां रात्रयोऽसुराणां तु दिनानि। एतेषां अहोरात्राणां षष्ट्युत्तरत्रिशतानां वर्षमेकं देवानामितिदिव्यं वर्षम्। द्वादशसहस्राणि च दिव्यवर्षाणि एको महायुगो यत्र दशांशभागेन धर्मादिचरणयोगने गुणनं(१२०००÷१०×४) कृत्वा सत्ययुगस्य ४८०० दिव्यवर्षाणि। अनेन प्रकारेण त्रेतायुगस्य (१२००० ÷ १०×३) ३६०० दिव्यवर्षाणि। द्वापरयुगस्य (१२००० ÷ १०×२) २४४० दिव्यवर्षाणि। कलियुगस्य च (१२००० ÷ १०×१) १२०० दिव्यवर्षाणि भवन्ति। अतएव सत्ययुगस्य १२००×४×३६० सौरवर्षाणि =१७,२८,००० मनुष्यवर्षाणि, त्रेतायुगस्य १२००×३×३६० सौरवर्षाणि = १२,९६,००० मनुष्यवर्षाणि, द्वापरयुगस्य १२००×२×३६० सौरवर्षाणि = ८,६४,००० मनुष्यवर्षाणि, कलियुगस्य १२००×१×३६० सौरवर्षाणि = ४,३२,००० मनुष्यवर्षाणि भवन्ति।

एकसप्ततिर्महायुगानां मन्वन्तरमेकं गणनम्। चतुर्दशमन्वन्तराणां ब्रह्मणो दिनमेक। तावानेवकालः ब्रह्मणोरात्रिः। इत्यलं विस्तरेण।

**पारस्करसूत्रम्।**

पारस्करगुह्यसूत्रे च आग्रहायणी (मार्गशीर्षः) मासकर्म [२८] बीजवपन [२९] मूलनक्षत्रीय जातकजन्मफल[३०]-मित्यपि सन्दर्भाः पठ्यन्ते।

**कल्पग्रन्थेषुज्यौतिषम्।**

आश्वलायनीये श्रौतसूत्रे गृह्यसूत्रे च श्रवण-पूर्णमास(पूर्णिमा) [३१] मधु-माधव-ऋतु [३२] -तिथ्यादि [३३]विषयका निर्देशाः प्राप्यन्ते।

---

[२८] पा.गु.सू.३/१२।

[२९] पा.गु.सू.२/१६।

[३०] पा.गु.सू.१/२१।

[३१] आश्व.सू.२/१/१।

[३२] श्रौ.सू.४/२२।

[३३] आश्व.सू.२/३/१,२/४/१,३/५,१/४/१

## प्रथमा दृष्टिः।

### महाभारतेज्यौतिषम्।

महाभारते ऋतवः अयने मघ्वादिमासाः, तिथयः चैत्रवैशाखयोः वसंतऋतुत्वं इत्यादि विषयनिरूपणेन स्पष्टं ज्ञायते यत् तत्कालीनसमाजे फलज्योतिषविषयकं गणितज्योतिषविषयकं ज्ञानं च अत्यन्तं विकसितं दृश्यते। महाभारते नामतः केवलं जयेति चाऽभिजितेमुहूर्तद्वयं निर्दिष्टम्। महाभारते यद्यपि मेषादि द्वादशराशीनां गणना नैव वर्तते तथापि नक्षत्रमानानुसारेण ग्रहाणां स्थितिं फलकथनं च निर्धारिते अभवताम्। महाभारते सोमो बृहस्पतिः शुक्रो बुधोऽङ्गारक एव च इत्यत्र चंद्रः बृहस्पतिः(गुरु), शुक्रः बुधः अंगारकश्चेति (मंगलः) ग्रहाणां पञ्चकं निर्दिष्टं प्राप्यते। एतेषु ग्रहेषु च मंगल–बुध–गुरुणाञ्च वक्रगतित्वम् प्रदर्शितम् (कर्ण/ १८/२२, २०/१, ११/१३–१५) तत्रैव (कर्ण. ११/१, शल्य. ११/१८) जातकफलकथनापेक्षया आवश्यकरुपानुसारं मंगलादि पञ्चग्रहाणां युद्धान्यापि संदिष्टानि।

### मुहूर्तग्रन्थानां संक्षिप्तपरिचयः।

भारतीयज्यौतिषेत्याख्ये ग्रन्थे मुहूर्तग्रन्थानां तद्ग्रन्थकाराणाञ्च विशदः विस्तारः(पृष्ठानि ६१४–६२२) कृतो वर्तते। तदत्र संक्षेपेण प्रस्तूयते।

(१) **रत्नकोशनामकग्रन्थस्य** **रचयितुर्ल्ललस्य** कालः शकसंवत ५६० (ख्रिस्ताब्दः ६२८) अस्ति।

(२) **रत्नमालानामग्रन्थस्य** कर्तुः **श्रीपतेः** समयः शकसंवत ९६१ (ख्रिस्ताब्दः १०३९) अस्ति। स आनंदपुरनिवासीति ज्ञायते। अस्य ग्रन्थस्य टीकाकारो माधवः शाके ११८५ त्तमे (ख्रिस्ताब्दे १२६३) विद्यमानः आसीत्।

(३–४) **राजमार्तंडग्रन्थस्य** **विद्वज्जनवल्लभाख्य** ग्रन्थस्य च रचयिता **महाराजभोजा** वर्तते। तयोश्च ग्रन्थयोः रचनाकालः शकसंवत ९६४ (ख्रिस्ताब्दः १०४२) वर्तते। विद्वज्जनवल्लभे लाभालाभादि १८ प्रकरणानि सन्ति।

(५) **वाराहिसंहितासदृशस्य** **अद्भुतसागरग्रन्थलेखकः** लक्ष्मणसेनात्मजो **बल्लालसेनो**ऽस्ति। तस्य रचनाकालः शकसंवत १०९० (ख्रिस्ताब्दः ११६८) वर्तते।

# प्रथमा दृष्टि: ।

(६) **व्यवहारप्रदीपग्रन्थस्य** रचयिता **पद्मनाभो**यमुनापुरनगरनिवासी आसीत्। स च शिवदासात्मज-गङ्गादासपुत्र:कृष्णदासस्य च पुत्रो आसीत्। रचनाकालश्च शकसंवत १०७२ (ख्रिस्ताब्द: ११५०) अस्ति। अस्मिन् ग्रन्थे श्रीपतिकृत रत्नमालेत्यादिमतानां निर्देशा: प्राप्यन्ते।

(७) **ज्योतिर्विदाभरण**मिति ग्रन्थस्य लेखकस्य **कालिदासस्य** समय: शकसंवत ११६४ (ख्रिस्ताब्द: १२४२) निश्चित: अस्ति । यद्यपि ग्रन्थेऽस्मिन् रघुवंशादिसाहित्यरचयितु कालिदासस्येयं कृतिरिति कल्यब्दे ३०६८ तमे मन्यते।

(८) **विवाहवृन्दावन**मित्याख्यग्रन्थस्य रचयितु: **केशवस्य** समय: शकसंवत ११६५ (ख्रिस्ताब्द: १२४३) वर्तते।

(९) **विवाहपटलेत्यपरनाम** सारसमुच्चयग्रन्थस्य कर्ता **शार्ङ्गधर:**। रचनाकालश्च शकसंवत १४०० (ख्रिस्ताब्द: १४७८) अस्ति।

(१०) **मुहूर्ततत्वइत्याख्यस्य** ग्रन्थस्यकर्ता **केशवो**नान्दिग्रामनिवासी आसीत्। रचनाकालश्च प्राय: शकसंवत १४२० (ख्रिस्ताब्द: १४९८) अस्ति। अस्मिन् ग्रन्थे नौकानिर्माणस्य नौकायात्रायाश्च मुहूर्तानि वर्णितानि सन्ति।

(११) **ज्योतिर्निबन्धाख्ये** ग्रन्थे धर्मशास्त्रीयमुहूर्तानां विचारो दृश्यते। तस्य रचयिता **शिवदास:** रचनाकालश्च प्राग् शकसंवत १४४४ (ख्रिस्ताब्द: १५२२) संभवति। यत: विवाहपटलस्य (अधोलिखितस्य १२ क्रमांकस्य) टीकायां अस्य ग्रन्थस्य परिचय: प्राप्यते।

(१२) **विवाहपटलेत्यस्य** रचयिता जगन्नाथपौत्र: रामात्मजो **पीताम्बर:** स्तम्भतीर्थ निवासी आसीत्। रचनाकालश्च शकसंवत १४४४ (ख्रिस्ताब्द: १५२२) अस्ति।

(१३) **ज्योतिदर्पणेति** ग्रन्थस्य रचयिता कोंडपल्लीग्रामस्य वत्सगोत्रोत्पन्न: काण्वशाखीय **कञ्चपल्लु** आसीत्। रचनाकालश्च शकसंवत १४७९ (ख्रिस्ताब्द: १५५७) अस्ति।

(१४) <u>**मुहूर्तमार्तंडेत्याख्यस्य**</u> ग्रन्थस्य कर्ता <u>**नारायण**</u> आसीत्। १६० पद्ययुक्तस्याऽस्य ग्रन्थस्योपरि स्वोपज्ञटीका वर्तते। रचनाकाल: शकसंवत १४९३ (ख्रिस्ताब्द: १५७१) अस्ति।

(१५) <u>**तोडरान्देत्यस्य**</u> ग्रन्थस्य रचयिता <u>**नीलकण्ठ**</u> आसीत्। रचनाकालश्च प्राय: शकसंवत १५०९ (ख्रिस्ताब्द: १५८७) अस्ति।

(१६) <u>**मुहूर्तचिन्तामणिरित्यस्य**</u> कर्तु: <u>**रामभट्टस्य**</u> तद्ग्रन्थोपरि स्वोपज्ञटीका प्रमिताक्षरेति अस्ति। रचनाकालश्च शकसंवत १५२२ (ख्रिस्ताब्द: १६००) अस्ति। अपराच पियुषधारेत्याख्याटीका रामभट्टभ्रातृव्येन गोविंदेन शकसंवत १५२५ (ख्रिस्ताब्द: १६०३) लिखिता वर्तते।

(१७) <u>**मुहूर्तचुडामणिरित्यस्य**</u> कर्तु: <u>**शिवज्योतिर्विद:**</u> काल: शकसंवत १५४० (ख्रिस्ताब्द: १६२८) अस्ति।

(१८) <u>**मुहूर्तकल्पद्रुमाख्यस्य**</u> रचयिता कृष्णात्रिगोत्रीये<u>**विट्ठलदीक्षितो**</u>ऽस्ति। तद्ग्रन्थोपरि स्वोपज्ञटीकाऽपि प्राप्यते। द्वयोश्च रचनाकाल: शकसंवत १५४९ (ख्रिस्ताब्द: १६२९) अस्ति।

(१९) <u>**मुहूर्तमालानामकस्य**</u> ग्रन्थस्य कर्ता शांण्डिल्यगोत्रीय केशवपौत्र: नृसिंहात्मज: <u>**रघुनाथोज्योतिर्विद्**</u> वर्तते। सोऽयं चितपावनो महाराष्ट्रीयो ब्राह्मण: काशीनिवासीचाऽऽसीत्। रचनाकालश्च शकसंवत १५८२ (ख्रिस्ताब्द: १६६०) अस्ति।

(२०) <u>**मुहूर्तदीपका**</u>ख्यग्रन्थस्य रचयिता कान्हजीपुत्र: **महादेव**<u>**ज्योतिर्विद्**</u> भूजकच्छस्य निवासी आसीत्। तद्ग्रन्थोपरिस्वोपज्ञटीकाऽपि प्राप्यते। रचनाकालश्च शकसंवत १५८३ (ख्रिस्ताब्द: १६६१) अस्ति।

(२१) <u>**मुहूर्तगणपतिरित्यस्य**</u> ग्रन्थस्य कर्ता भारद्वाजगोत्रीय रावलावटंक: हरिशंकर आत्मज: <u>**गणपतिर्ज्योतिर्विद्**</u> औदीच्यगुर्जरविप्र: आसीत्। रचनाकालश्च शकसंवत १६०७ (ख्रिस्ताब्द: १६८५) अस्ति।

## प्रथमा दृष्टिः।

SMT. HANSA MEHTA LIBRARY

(२२) **मुहूर्तसिन्धुरित्यस्य** ग्रन्थस्य रचयिता दातारकुलोत्पन्नो **गङ्गाधरशास्त्री** पूणे निवासी शकसंवत् १७४४-१८१० तमे काले विद्यमान आसीत्। (ख्रिस्ताब्दः १८२२-१८८८)। रचनाकालश्च शकसंवत् १८०५ (ख्रिस्ताब्दः १८८३) अस्ति।

**संहिताग्रन्थानां विषयवस्तुनिरूपणम्।।**

वराहमिहिरविरचितायां चतुरधिकशताध्याय्यां बृहत्संहितायाम**एकादशश्लोक**निबद्धशास्त्रोपनयनाख्ये **प्रथमाऽध्याये मङ्गलाचरणं** सृष्ट्युत्पतिः संख्यादिमतानि ज्यौतिषशास्त्रस्वरूपं च वर्णितम्। **एकोनचत्वारिंशच्छ्लोकेषु सांवत्सरसूत्रनामके द्वितीयाऽध्याये** दैवज्ञलक्षणानि यात्राविभागः संहिताप्रशंसा तिथ्यादिनक्षत्रादि च वर्णितानि। **चत्वारिंशच्छ्लोकेषु आदित्यचाराख्ये तृतीयाऽध्याये** अयनादिविचारो वेधलक्षणं सूर्यगतविविधाऽवस्था लक्षणफलादिविचारश्च प्रदर्शिताः। **द्वात्रिंशच्छ्लोकेषु चन्द्रताराख्ये चतुर्थेऽध्याये** चन्द्रसम्बन्धि नक्षत्रयोगादि ग्रहणादि चन्द्रस्य च नक्षत्रैः सह युतिभेदादिवर्णन-मुल्कापातलक्षणानि च संकथितानि। **अष्टनवतीश्लोकेषु राहुनामके पञ्चमेऽध्याये** राहुविषयकानि विविधानिमतानि ग्रहणभेदाः पर्वविचारः स्पर्शमोक्षविचारश्च प्रकटिताः। **त्रयोदशश्लोकेषु भौमचारभिधे षष्ठाऽध्याये** पञ्चमुखमङ्गललक्षणं वर्णितमस्ति। **विंशतिश्लोकेषु बुधचारनामके सप्तमाऽध्याये** बुधस्योदयादिपराशरोक्त सप्तगतिलक्षणं निरूपितम् । **त्रिपञ्चाशच्छ्लोकेषु बृहस्पतिसंज्ञितेऽष्टमे**ऽध्याये बृहस्पतिवर्षविचारो नक्षत्रमाससम्बद्धलक्षणं युगादिविचारः संवत्सरादिफलं गुरुबिम्बफलं च वर्णितम्। **पञ्चचत्वारिंशच्छ्लोकेषु शुक्रचारनामकेनवमाऽध्याये** शुक्रवीथिलक्षणं शुक्रस्य मण्डलादिफलञ्च नक्षत्रानुसारेण उदयास्तफलञ्च दर्शितम्। **एकविंशतिश्लोकेषु शनैश्चरचाराभिधे दशमाऽध्याये** नक्षत्रानुसारं शनैश्चरस्यफलं गुरुयुतिफलं च कथितम्। **द्विषष्टीश्लोकेषु केतुचारनामके द्वादशाऽध्याये** केतोः उदयास्तविचारश्चतुर्दशनामरूपाणि तत्फलं च निरूपितम्।

**एकविंशतिश्लोकेषु अगस्त्यचाराख्ये द्वादशेऽध्याये** समुद्रादि वर्णनमगस्त्यउदयास्तविचारस्तत् फलं च कथितानि। **एकादशश्लोकेषु सप्तर्षिचाराख्ये त्रयोदशाऽध्याये** सप्तर्षिविचारो वर्णितोऽस्ति। **द्वात्रिंशच्छ्लोकेषु नक्षत्रकूर्माभिधे चतुर्दशाऽध्याये** कूर्मचक्रे नक्षत्रविभाजनं विविधप्रदेशस्थितनक्षत्रस्थितिवर्णनं भारतवर्षस्य नवद्वीपानुसारेण विभागाश्च वर्णिताः। **द्वात्रिंशच्छ्लोकेषु नक्षत्रव्यूहनामके पञ्चदशाऽध्याये** कृतिकादिपदाथास्तत्कार्यं तत्फलनिरूपणं च वर्तते। **एकचत्वारिंशच्छ्श्लोकेषु ग्रहभक्तियोगाख्ये षोडशाऽध्याये** सूर्यादिग्रहाणां कारकत्वफलं प्रशासित

प्रदेशनिरूपणं चास्ति। **सप्तविंशतिश्लोकेषु** **ग्रहयुध्धाख्ये** **सप्तदशाऽध्याये** ग्रहाणां परस्परं बलाबलविचारस्तत्फलं च निरूपिते स्तः। **अष्टश्लोकेषु** **शशिग्रहसमागमनामके** **अष्टादशाध्याये** चन्द्रगतिश्चन्द्रस्य अन्य ग्रहैश्च सह युतिस्तत्फलं च प्रदर्शितम्। **द्वाविंशतिश्लोकेषु** **ग्रहवर्षफलाभिधे** **एकोनविंशतितमेऽध्याये** चन्द्रमङ्गलादिनां वर्षेशफलं प्रदर्शितं वर्तते। **नवश्लोकेषु** **ग्रहशृंगारकनामकेविंशतितमेऽध्याये** ग्रहाणामुदयास्तविचारोऽशुभसंस्थानविशेषो योगफलानि च वर्णितानि सन्ति।

**सप्तत्रिंशच्छ्लोकेषु** गर्भलक्षणाख्ये **एकविंशतितमेऽध्याये** वर्षाप्रयोजनं, मेघगर्भसमयनिश्चयवारिदवाय्वोः लक्षणं मासानुसारेण गर्भलक्षणं गर्भघातलक्षणानि च निरूपितानि वर्तन्ते। **अष्टश्लोकेषु** गर्भधारणनामके **द्वाविंशतितमेऽध्याये** वायुद्वारा गर्भधारणपरीक्षानिरूपिताऽस्ति। **दशश्लोकेषु** प्रवर्षणाख्ये **त्रयोविंशतितमेऽध्याये** प्रथमवर्षायाः नक्षत्रं तत् प्रभावलक्षणं च वर्णितं अस्ति। **षट्त्रिंशच्छ्लोकेषु** **रोहिणीयोगाभिधे** **चतुरविंशतितमेऽध्याये** योगवायुपरीक्षाविधिः भाविसस्यसम्बन्धी शुभाशुभशुकनावली रोहिणीशकटभेदविचारश्च प्रदर्शिताः सन्ति। **षट्श्लोकेषु** **स्वातिनामके** **पञ्चविंशतितमेऽध्याये** रोहिणीस्वात्योः चन्द्रयोगफलं वृष्ट्यनुसारिफलनिर्देशश्च निरूपितोस्तिः। **त्रयोदशश्लोकेषु** **आषाढीयोगनामके** **षड्विंशतितमेऽध्याये** आषाढिपूर्णिमाविचार स्तुलालक्षणं तोलनविचारः पापयोगविचारश्च वर्णिताः सन्ति। **दशश्लोकेषु** **वातचक्राख्ये** **सप्तविंशतितमेऽध्याये** दिशानुसारं वायुफलं वर्णितमस्ति। **चतुर्विंशतिश्लोकेषु** **सद्योवर्षणाख्येऽष्टाविंशतितमेऽध्याये** ग्रहयोगादिभिर्वर्षाविचारः प्रकटितो वर्तते। **चतुर्दशश्लोकेषु** **कुसुमलतानामके** **एकोनत्रिंशतितमेऽध्याये** अशोकपाटलेत्यादि वृक्षादीनां पुष्पफलैर्भविष्यविचारः कृतो वर्तते। **त्रयस्त्रिंशच्छ्श्लोकेषु** **सन्ध्यालक्षणाख्ये** **त्रिंशत्तमेऽध्याये** सन्ध्यालक्षणम् मृगचेष्टा पक्षिचेष्टा फलविचारः परिघरेखा सूचितशुभाशुभफलविचारश्च वर्णिताः सन्ति। **पञ्चश्लोकेषु** **दिग्दाहाभिधे** **एकत्रिंशेध्याये** वर्णभेद दिशाभेदादि सूचित दिग्दाहफलविचारः कृतो वर्तते । **एकत्रिंशत्तमेच्छ्लोकेषु** **भूकम्पनामके** **द्वात्रिंशत्तमेऽध्याये** इन्द्रवरुणवेलादिमण्डलविचारः प्राचीनार्वाचीनमतपुरःसरमुत्तरकाशी लाटूरप्रभृतिप्रदेशानुभूतभूकम्पानां वैज्ञानिकं विश्लेषणं फलानिनिरूपितानि सन्ति। **त्रिंशच्छ्लोकेषूल्कालक्षणाख्ये** **त्रयत्रिंशत्तमेऽध्याये** उल्कास्वरूपफल-विचारः कृतो वर्तते। **त्रयोविंशतिश्लोकेषु** **परिवेषलक्षणाभिधे** **चतुस्त्रिंशत्तमेऽध्याये** परिवेषलक्षणं नामानि तदन्तरगतग्रहाणां शुभाशुभफलविचारश्च निरूपिताः वर्तन्ते। **अष्टश्लोकेषु**

**इन्द्रधनुषलक्षणाख्ये**[३४] **पञ्चत्रिंशत्तमेऽध्याये**ऽध्यायनामानुसारं[३५] विचारः कृतो दृश्यते। **पञ्चश्लोकेषु गन्धर्वनगरलक्षणनामके षड्त्रिंशत्तमेऽध्याये**ऽध्यायनामानुसारं विचारः कृतो दृश्यते। **श्लोकत्रये प्रतिसूर्यलक्षणाभिधे सप्तत्रिंशत्तमेऽध्याये** प्रतिसूर्यवर्णानुसारं फलविचारः कृतो वर्तते। **श्लोकपञ्चके निर्घातलक्षणाख्ये अष्टत्रिंशत्तमेऽध्याये**ऽध्यायनामानुसारेण फलविचारः वर्णितोऽस्ति। **चतुर्दशश्लोकेषु सस्यजातकनामके एकोनचत्वारिंशत्तमेऽध्याये** ग्रीष्मशरदोद्भूतसस्यजातविचारः कृतो वर्तते। **त्रयोदशश्लोकेषु द्रव्यनिश्चयाख्ये चत्वारिंशत्तमेऽध्याये** मेषादिमीनपर्यंत राशिशासितद्रव्यप्रकारः फलविचारश्च निरूपितो विद्यन्ते।

**चतुर्दशश्लोकेष्वर्घ काण्डाख्ये एकचत्वारिंशत्तमेऽध्याये** महर्घसमर्घयोः मासगतविचारो मेषादि संक्रान्तिफलं च वर्णितमस्ति। **अष्टषष्टीश्लोकेषु इन्द्रध्वजसम्पदाख्ये द्वाचत्वरिंशत्तमेऽध्याये** इन्द्रध्वजमाहात्म्यं तदंगतो शास्त्रीयोविचार इन्द्रध्वजाययुक्तवृक्षादिशुभाशुभविचारस्तदर्थं होमहवनलक्षणं इन्द्रध्वजस्थापनविसर्जनेत्यादिविचारा निरूपिता वर्तन्ते। **अष्टाविंशतिश्लोकेषु नीराजनाख्ये त्रिचत्वारिंशत्तमेऽध्याये** नीराजन(नीर+अजन=जलप्रक्षेपणम्) शांतिविधिस्तदर्थ मुचितकालो यज्ञादिविधिविधानं तत्फलं च प्रदर्शितं वर्तते। **षोडशश्लोकेषु खञ्जनलक्षणाख्ये चतुश्चत्वारिंशत्तमे-ऽध्याये** खंजनदर्शनस्थानफलं अनिष्टनिवृत्ति उपायश्च वर्णितोस्ति। **अष्टनवतिश्लोकेषूत्पातनामके पञ्चचत्वारिंशत्तमेऽध्याये** अग्निवृक्षाद्युत्पातहेतुस्वरूपप्रभावफलानि देवताभेदफलं शान्तिविधानं च वर्णितमस्ति। **अष्टाविंशतिश्लोकेषु मयूरचित्रकाख्ये षट्चत्वारिंशत्तमेऽध्याये** सूर्यचन्द्रादिग्रहचार-फलं द्विचन्द्रदर्शनफलं द्विसूर्यदर्शनफलं युद्धादिषु जयपराजयविचारो गन्धर्वपुरलक्षणं[३६] च वर्णितमस्ति। **सप्तासीतिश्लोकेषु पुष्यस्नाननामके सप्तचत्वारिंशत्तमेऽध्याये** पुष्यशांतिस्तोत्रं स्नानविधिः पूजाविधिर्जलस्नानादि वैदिकपौराणिकमन्त्रा राजधर्माः च निरूपिताः सन्ति। **अष्टश्लोकेषु पट्टलक्षणाभिधे अष्टचत्वारिंशत्तमेऽध्याये** पट्ट(मुकुट) लक्षणविचारः कृतो वर्तते। **षड्विंशतिश्लोकेषु खड्गलक्षणाख्ये एकोनपञ्चाशत्तमेऽध्याये** यज्ञस्य खड्गस्य शुभाशुभवर्णादि विचारः कृतो वर्तते। **चतुश्चत्वारिंच्छ्लोकेष्वंगविद्यानामके पञ्चाशत्तमेऽध्याये अङ्गस्पर्शचेष्टाभिः** प्रश्नज्ञानं प्रश्नस्य शुभाशुभस्थानविचारो नष्टवस्तुपुनः प्राप्तिविचारो गर्भस्थशिशोः लिङ्गविचाराश्च वर्णिताः सन्ति। **दशश्लोकेषु पिटकलक्षणाख्ये एकपञ्चाशत्तमेऽध्याये**ऽध्यायानुसारेणविचारः कृतो दृश्यते।

---

[३४] एतर्थं लक्षणादि विचाराःषट्त्रिंशत्तमेऽध्याये प्रागे वर्णिताः।

[३५] यत्रयत्राऽध्याये अध्यायनान्मानुसारं एवविषयो वर्णतोऽस्ति तत्रेव "अध्यायनामानुसारविचार इति लिखित मस्ति। अपरेष्वध्यायेषु अध्यायनामतो नैकविषयाः वर्णिताः सन्ति तत्र भेदपूवर्कं प्रदर्शितमस्ति

[३६] एतदर्थं लक्षणादिविचाराः षट्त्रिंशत्तमेऽध्याये वर्णिताः।

## प्रथमा दृष्टिः।

**त्रयोविंशत्यधिकशतश्लोकेषु** **वास्तुविद्याख्ये** **द्विपञ्चाशत्तमेऽध्याये** वास्तुपुरषोत्पत्तिर्राजादि-भवनाकारविचारो विविधवास्तुप्रकाराश्च कृता वर्तन्ते। **चतुर्विंशत्यधिकशतश्लोकेषु** **दकार्गलाख्ये** **त्रिपञ्चाशत्तमेऽध्याये** दकार्गल(दक + अर्गल) प्रयोजनं पृथ्वीगतशीरा: कूपादिदिशाविचारश्च वर्णिता: सन्ति। **एकत्रिंशच्छ्लोकेषु** **वृक्षायुर्वेदनामके** **चतुश्पञ्चाशत्तमेऽध्याये** वृक्षविषयका विविधा विचारा: कृता: सन्ति। **एकत्रिंशच्छ्लोकेषु** **प्रासादलक्षणाभिधे** **पञ्चपञ्चाशत्तमेऽध्याये** देवालयनिर्माणकालो विविधा: प्रकारा वर्णिता: सन्ति। **अष्टश्लोकेषु** **वज्रलेपाख्ये** **षट्पञ्चाशत्तमेऽध्याये** वज्रलेपप्रकारा वर्णिता: सन्ति। **सप्तपञ्चाशच्छ्लोकेषु** **प्रतिमालक्षणाख्ये** **सप्तपञ्चाशत्तमेऽध्याये**ऽध्यायनामानुसारं विचार: कृतो वर्तते। **चतुर्दशश्लोकेषु** **वनसम्प्रवेशाभिधे** **अष्टपञ्चाशत्तमेऽध्याये** मूर्त्यर्थं वृक्षकर्तनविधि वर्णितोस्ति। **द्वाविंशतिश्लोकेषु** **प्रतिमाप्रतिष्ठानामके** **एकोनषष्टितमे-ऽध्याये**ऽध्यायनामनुसारं विचार: कृतो वर्तते। **पञ्चदशश्लोकेषु** **गोललक्षणाभिधे** **षट्तिमेऽध्याये** आचार्यनिर्दिष्टधेन्वादिशुभाशुभलक्षणविचार: कृतोऽस्ति।

**श्लोकद्वये** **कुक्कुटलक्षणाख्ये** **एकषष्टितमेऽध्याये**ऽध्यायनामानुसारं शुभाशुभलक्षणविचार: कृतो वर्तते। **श्लोकत्रये** **कूर्मलक्षणाख्ये** **त्रिषष्टितमेऽध्याये**ऽध्यायनामानुसारं विचार: कृतो वर्तते। **एकादशश्लोकेषु** **छागलक्षणाभिधे** **चतु:षष्टितमेऽध्याये** विविधरोगलक्षणविचार: कृतो वर्तते। **पञ्चश्लोकेषु** **अश्वलक्षणाख्ये** **पञ्चषष्टित्तमेऽध्याये**ऽध्यायनामानुसारं विचार: कृतो वर्तते। **दशश्लोकेषु** **हस्तिलक्षणनामके** **षोडशषष्टित्तमे**ऽध्यायेऽध्यायनामानुसारं विचार: कृतो वर्तते। **षोडशोत्तरशतश्लोकेषु** **पुरुषलक्षणनामके** **सप्तषष्टित्तमेऽध्याये** पुरुषादेहादि लक्षणविचार: कृतो वर्तते। **चत्वारिंशच्छ्लोकेषु** **पञ्चमहापुरुषाख्ये** **अष्टषष्टित्तमेऽध्याये** मालव्यादि- पञ्चमहापुरुष-लक्षणविचार: कृतो वर्तते। **षड्विंशतिश्लोकेषु** **स्त्रीलक्षणनामके** **एकोनसप्ततित्तमेऽध्याये** स्त्रीणां अङ्गोपाङ्गलक्षणफलं तत् शुभाशुभफलं च वर्णितेस्त:। **त्रयोदशश्लोकेषु** **वस्त्रच्छेदाख्ये** **सप्ततितमेऽध्याये** नक्षत्रोपविभागास्तदनुसारं वस्त्रच्छेदफलं पादत्राणछेदफलं तत्सम्बन्धि च पराशरमतमिति वर्णितानि सन्ति। **षट्श्लोकेषु** **चामरलक्षणाभिधे** **एकसप्ततित्तमेऽध्याये-**ऽध्यायनामानुसारं विचार: कृतो वर्तते। **षट्श्लोकेषु** **छत्रलक्षणाभिधे** **द्विसप्ततित्तमेऽध्याये-**ऽध्यायनामानुसारं विचार: कृतो वर्तते। **विंशतिश्लोकेषु** **स्त्रीप्रशंसानामके** **त्रिसप्ततित्तमेऽध्याये** स्त्रीणां माहात्म्यं गुणवर्णनं चारित्र्यप्रशंसा च वर्णिता: सन्ति। **दशश्लोकेषु** **सौभाग्यकरणाख्ये** **चतु:सप्ततित्तमेऽध्याये** स्त्रीणां प्रणयप्राप्तिनिमित्तकभाग्यदुर्भाग्यविचारश्च कृतो वर्तते। **द्वादशश्लोकेषु-कान्दर्पिकनामके** **पञ्चसप्ततित्तमेऽध्याये** कामशास्त्रविषयक वीर्योद्युत्पत्तिविषयको विचार: कृतो वर्तते। **सप्तत्रिंशच्छ्लोकेषु** **गन्धयुक्तिनामके** **षट्सप्तत्तमेऽध्याये** मूर्धजानां कृष्णीकरणादिकधूपगंधपानादि

विचार: कृतो वर्तते। षड्विंशतिश्लोकेषु स्त्रीपुरुषसमागमाख्ये सप्तसप्तित्तमेऽध्याये विविध स्त्रीलक्षणविचारस्तत्समागमसारासारविचारो गर्भाधानयोगाश्च निरूपिता: सन्ति। एकोनचत्वारिंशच्छ्लोकेषु शय्यासनलक्षणनामके अष्टसप्ततित्तमेऽध्यायेऽध्यायनामानुसारं विचार: कृतो वर्तते। अष्टादशश्लोकेषु रत्नपरीक्षाभिधे एकोनाशीतित्तमेऽध्यायेऽध्यायनामानुसारं विचार: कृतो वर्तते। षडत्रिंशत्श्लोकेषु मुक्तालक्षणनामके अशीतितमेऽध्यायेऽध्यायनामानुसारं विचार: कृतो वर्तते।

एकादशश्लोकेषु पद्मरागलक्षणनामके एकाशीतितमेऽध्यायेऽध्यायनामानुसारं विचार: कृतो वर्तते। एकस्मिन्नेवश्लोके मरकतलक्षणनामके द्व्यशीतितमेऽध्यायेऽध्यायनामानुसारं विचार: कृतो वर्तते। श्लोकद्वये दीपकलक्षणनामके त्र्यशीतित्तमेऽध्यायेऽध्यायनामानुसारं विचार: कृतो वर्तते। नवश्लोकेषु दन्तकाष्ठलक्षणाभिधे चतुरशीतितमेऽध्याये विविधवृक्षाणां दन्तधावनकाष्ठं दन्तधावनविधिस्तत्प्रेक्षणफलविचारश्च कृता: वर्तन्ते। अशीतिश्लोकेषु शकुनाख्ये पञ्चाशीतितमेऽध्याये शकुनविषयक विविधविचारा: कृता वर्तन्ते। पञ्चचत्वारिंशच्छ्लोकेषु अन्तरचक्रनामके षडशीतितमेऽध्याये शान्तदिप्तदिशानां च दिग्चक्रानुसारेणफलं वर्णितमस्ति। सप्तचत्वारिंशच्छ्लोकेषु निरुताभिधे( पक्षिशब्द:) सप्ताशीतितमेऽध्याये विहङ्गानां पशुनाञ्च रुतानुसारं शकुनफलं वर्णितं अस्ति। विंशतिश्लोकेषु श्वचक्राभिधे अष्टाशतित्तमेऽध्याये कुक्कुरसम्बन्धि चेष्टाविचार: कृतो वर्तते। चतुर्दशश्लोकेषु शिवारुताख्ये एकोननवतित्तमेऽध्यायेऽध्यायनामानुसारं विचार: कृतो वर्तते। श्लोकेत्रये मृगचेष्टाख्ये नवतितमेऽध्यायेऽध्यायनामानुसारं विचार: कृतो वर्तते। श्लोकत्रये गवेङ्गितनामके एकनवतित्तमेऽध्यायेऽध्यायनामानुसार विचार: कृतो वर्तते। पञ्चदशश्लोकेषु अश्वेङ्गितनामके द्विनवतित्तमेऽध्यायेऽध्यायनामानुसारं विचार: कृतो वर्तते। चतुर्दशश्लोकेषु हस्तिचेष्टाभिधे त्रयनवतितमेऽध्यायेऽध्यायनामनुसारं विचार: कृतो वर्तते। द्विषष्टीश्लोकेषु वायसविरुताख्ये चतुर्णवतितमेऽध्यायेऽध्यायनामानुसारं विचार: कृतो वर्तते। द्वात्रिंशच्छ्लोकेषु शाकुनोत्तराख्ये पञ्चनवतित्तमेऽध्याये वर्षादिसूचकशकुनविचारस्तात्कालिकशकुन कुण्डलीविचारश्च कृतो दृश्यते। सप्तदशश्लोकेषु पाकाभिधे षण्णनवतितमेऽध्यायेऽध्यायनामनुसारं विचार: कृतो वर्तते। षोडशश्लोकेषु नक्षत्रकर्मगुणाख्ये सप्तनवतितमेऽध्याये नक्षत्राणां तारादेवतादि गणनाविचार: सकलकार्येषु लग्नशुद्धिविचार: च कृतो वर्तते। एकादशश्लोकेषु तिथिकरणाभिधेऽष्टनवतित्तमेऽध्याये तिथिकरणयो: स्वरूपगुणकार्यादिगणनाविचार: संक्षिप्तविवाहपटलम् लग्नग्रहमासमेलापकादि शुद्धिविचारा: कृता वर्तन्ते। एकोनविंशतिश्लोकेषु नक्षत्रशीलनामके नवनवतितमेऽध्यायेऽध्यायनामानुसारं विचार: कृतो वर्तते। चतुषष्टीश्लोकेषु ग्रहगोचरनामके

## प्रथमा दृष्टि:।

**एकशतत्तमेऽध्याये** विभिन्नग्रहाणां गोचरफलादेशविचारोऽशुभग्रहादिगोचरविषये पूजादिविधानं रविवासरादि मन्दवासरपर्यन्तं विविधकार्य विचाराश्च कृता वर्तन्ते। **षोडशश्लोकेषु रूपसत्राख्ये एकाधिकशतत्तमेऽध्याये** नक्षत्रपुरुषाङ्ग विचारो रूपकालनिर्णयो व्रतफलं प्रतिमासिकविष्णुव्रतविचाराश्च कृता वर्तन्ते। **षट्श्लोकेषु उपसंहाराख्ये द्व्यधिकशततमेऽध्याये** श्रीवराहमिहिरेण स्वकीयबृहत्-संहिताया उपसंहार: प्रस्तुत: कृतो वर्तते। **त्रयोदशश्लोकेषु शास्त्रानुक्रमणीनामके त्र्यधिकशतत्तमेऽध्याये** समग्रस्य ग्रन्थस्य चर्चितविषयानुक्रमणी प्रदत्ता वर्तते। अन्ते च **त्रयोदशश्लोकेषु विवाहपटलनामके चतुरधिकशतत्तमेऽध्याये** विवाहकुण्डल्यां जातकस्य लग्नादि(प्रथमाभाव) द्वादश(व्यय)भावपर्यन्तं तत्रस्थग्रहफलं, गोधूलिप्रशंसा प्रस्थापिते स्त:।

अस्मिन् महानिबन्धे प्रथमादृष्ट्यां ज्यौतशास्त्रेतिहासनाम्ना वेदेभ्य आरभ्य अर्वाचीनकालीनानां ग्रन्थानां ग्रन्थकाराणाञ्च जीवनसमयौ विषयवस्तु च सुगृहीतो तत्र श्रीमतां शङ्करबालकृष्णदीक्षितचरणानां "भारतीयजोतिषाख्य" ग्रन्थस्य श्रीशिवनाथ झारखण्डीकृत हिन्दीभाषायां अनुवाद एवमूलस्रोतस्तत्र श्रीशङ्करबालकृष्णदीक्षितचरणै: सर्वेषां ग्रन्थानां ग्रन्थकाराणां च समयनिर्देश: शकाब्दगणनया स्वीकृत:। अत्र तु गुर्जरादिषूत्तरभारते वैक्रमाब्दानां प्रचलीतत्वात् सर्वत्र वैक्रमाब्दा: प्रथमं निर्देष्टास्त: ख्रिस्ताब्दा ततश्च शकाब्दा दर्शिता:।

### प्राचीनसिद्धान्तपञ्चकम्।

वैदिकसाहित्यादारभ्य वेदाङ्गज्योतिषपर्यन्तकाले प्रायो ग्रहविषयकं सामान्यज्ञानमेव प्राप्यते, यद्यपि ग्रहाणां स्पष्टगतय:, स्थितिविषयकं च ज्ञानं अत्यल्पमेव प्राप्यते। किन्तु प्राचीनकाले पञ्चसिद्धान्ता: प्रचलिता: आसन्निति वराहमिहिरस्य (वैक्रमाब्द: २३ =ख्रिस्ताब्द: ३४ पूर्वे =शकाब्द: १२२ पूर्वे) पञ्चसिद्धान्तिकाग्रन्थे पठ्यन्ते।

पौलिशरोमकवसिष्ठसौरपैतामहास्तु पञ्चसिद्धान्ता:।

यद्यपि पञ्चसिद्धान्तविषयचर्चा तत्तत्सिद्धान्तकालानुसारेणाऽत्र प्रस्थाप्यते।

(अ) **पितामहसिद्धान्त:।** अस्मिन् सिद्धान्ते नक्षत्रानयनकालधनिष्ठानक्षत्रादारभ्यते। अत: पितामहसिद्धान्तस्यकालो वेदाङ्गकालसमीपतो (वैक्रमाब्दात् १३४३ पूर्वे =ख्रिस्ताब्दात् १४०० पूर्वे =शकाब्दात् १३२२ पूर्वे) इति निश्चीयते।

## प्रथमा दृष्टिः।

अस्मिन् सिद्धान्ते सूर्यचन्द्रवर्षगणनया युगमानं, अधिकमासः क्षयतिथयः, दिनमानं नक्षत्रानयनरीतिश्चेति विषयाः वर्णिता इति वराहमिहिरो लिखति।

पितामहसिद्धान्तस्य सम्प्रदायत्रयं प्रचलितं अस्ति। तेश्च ब्रह्मगुप्तोक्तः प्राचीनब्रह्मसिद्धान्तः शाकल्योक्तः विष्णुधर्मपुराणोक्तश्च पश्चात्कालीनः मन्यन्ते।

(ब) **प्राचीनवसिष्ठसिद्धान्तः।** प्राचीनवसिष्ठोऽर्वाचीनवासिष्ठश्चेति वसिष्ठसिद्धान्तस्य सम्प्रदायद्वयं प्राप्यते। प्रथमस्तावत् प्राचीनो वसिष्ठो वराहमिहिरेण (वैक्रमाब्दात् २३ =ख्रिस्ताब्दात् ३४ पूर्वे =शकाब्दात् १२२ पूर्वे) विभ्रष्ट इति कथितः अपरश्च ब्रह्मगुप्तेन (वैक्रमाब्दः ६५५ =ख्रिस्ताब्दः ५९८ =शकाब्दः ५२०) वासिष्ठसिद्धान्तः विष्णुचन्द्रकृतवासिष्ठसिद्धान्तश्चेति नाम्ना निर्दिष्टः। विष्णुचन्द्रस्य समयस्तु (वैक्रमाब्दः ५६२ =ख्रिस्ताब्दः ५०५ =शकाब्दः ४२७) मन्यते।

तत्र युगानियातवर्षाणिभगणं सूर्यचन्द्रादिनाञ्च मध्यमत्वादिविषयावर्णिताः सन्ति।

**प्राचीनपौलिशसिद्धान्तः।**

पञ्चसिद्धान्तिकायां वराहमिहिरेण प्राचीनपौलिशसिद्धान्तः प्राथम्येन कथितः। तत्र अवन्त्याः चरांशाः ७ घट्यः २० पलानि वाराणस्याश्च ९ घट्यः निर्दिष्टाः। अवन्त्याः परमाल्पदिनमानं २६ घट्यः २६ पलानि परमाधिक्यदिनमानं च ३३ घट्यः ३४ पलानि प्रदत्ते। वाराणस्याश्च परमाल्पदिनमानं २६ घट्यः ०४ पलानि परमाधिक्यदिनमानञ्च ३३ घट्यः ५६ पलानि च प्रदत्ते। लाटदेवेन। अस्य सिद्धान्तस्य व्याख्याकृता ज्ञायते। भट्टोत्पलेन (वैक्रमाब्दः १०२३ =ख्रिस्ताब्दः ९६६ =शकाब्दः ८८८) बृहत्संहिताटीकायां पौलिशसिद्धान्तस्य भगणमानस्य चर्चा कृता वर्तते। अस्मिन् सिद्धान्ते अन्येषां सौरेतिसंज्ञायाः स्थाने सावन इति संज्ञा स्वीकृता दृश्यते। यद्यपि वराहमिहिरनिर्दिष्टात् वर्षमानात् भट्टोत्पल्ल निर्दिष्टं वर्षमानं भिन्नमिति कथ्यते। भट्टोत्पलानुसारेण पौलिशसिद्धान्तस्याऽपरं सम्प्रदायद्वयं प्रथितमासीत्।

**प्राचीनरोमकसिद्धान्तः।**

अस्य सिद्धान्तस्य सम्प्रदायद्वयं प्रचलीतम्। प्रथमो मूलसिद्धान्तो ग्रीकज्योतिर्विदाहिपोर्केन (वैक्रमाब्दः २०७ पूर्वे =ख्रिस्ताब्दः १५० पूर्वे =शकाब्दः २२८ पूर्वे) रचितो दृश्यते। किन्त्वत्र युगादिमानस्याभावाद् ब्रह्मगुप्तेन (वैक्रमाब्दः ६५५ =ख्रिस्ताब्दः ५९८ =शकाब्दः ५२०) नैव

स्विक्रीयते। अत एव श्रीषेण (वैक्रमाब्द: ५६२ =ख्रिस्ताब्द: ५०५ =शकाब्द: ४२७) नूतनो रोमकसिद्धान्त: प्रस्थापितो यत्र वासिष्ठसिद्धान्तात् युगादिमानस्यान्तर्भाव: कृत:।

अत्र अहर्गणसाधनं, सूर्यचन्द्रग्रहसाधनं, सूर्यग्रहणं, चन्द्रग्रहणमित्यादि विषया: वर्णिता: आसन्निति वराहमिहिरो लिखति।

**प्राचीनसूर्यसिद्धान्त:।**

वराहमिहिरकृतपञ्चसिद्धान्तिकायां सौरसिद्धान्ते सूर्यचन्द्रानयनगणना प्रदत्ता। विशेषश्च भौमादिपञ्चग्रहानयनगणनाऽपि प्रस्थापिता दृश्यते। पौलिशसिद्धान्तस्यब्रह्मगुप्तस्य च खण्डखाद्यटीकायां च वर्णिता: कतिपयसिद्धान्ता: सौरसिद्धान्तै: सह साम्यं धारयन्ति। अलबेरुनीमते सौरसिद्धान्तो लाटकृत: टॉलेमी मते नाऽयं लाटकृत इति।

अस्मिन् सिद्धान्ते सूर्यचन्द्रग्रहणविचारो भौमादिग्रहाणां वक्रित्वमार्गित्वादिविचारो युगारम्भकालश्च प्रसिद्धा: सन्ति।

**अर्वाचीनसिद्धान्तपञ्चकम्।**

**सूर्यसिद्धान्त:।**

अस्य प्रणेता मय इति ज्ञायते, य: सूर्यदेवस्य अंशरूपेणपुरुषेण म्लेच्छजातिमवाप्यरोमनगरे दृष्ट:। यद्यपि ब्रह्मगुप्त: (वैक्रमाब्द: ६५५ =ख्रिस्ताब्द: ५९८ =शकाब्द: ५२०) समयात् पूर्वमेवाऽस्य पूज्यत्वेन प्रचलितत्वात् पञ्चशतकात् पूर्वकाल: गण्यते। अत्र चतुर्दशाधिऽकरणानि पञ्चशती च पद्यानां प्राप्यन्ते येषु कानिचित् पद्यानि[३७] लाटकृतान्यपि विद्यन्ते।

अत्र नवविधकालमानानि, मध्यमाधिकार:, स्पष्टाधिकारो ग्रहणाधिकार:, पाताधिकार:, शृङ्गोन्नति: त्रिप्रश्नाधिकार:, ग्रहयुत्याधिकार इत्यादि विषया: वर्णिता: सन्ति।

---

[३७] यद्यपि अलबेरुनी (वैक्रमाब्द: ९९४-११०५ ख्रिस्ताब्द: ९३७-१०४८, शकाब्द: ८५९-९७०) समग्रं सूर्यसिद्धान्तलाटकृतमिति-स्वीकरोति तथापि वराहमिहिरेण (वैक्रमाब्द: २३, ख्रिस्ताब्द: ३४पूर्वे, शकाब्द: १२२पूर्वे) स्वकीयायां पञ्चसिद्धान्तिकाया इदृश उल्लेखो न कृत:।

## प्रथमा दृष्टिः।

एतद् सिद्धान्तानुसारेण तैलङ्गणप्रदेशस्य बाविलालस्य करणग्रन्थः (वैक्रमाब्दः १३५५ =ख्रिस्ताब्दः १२९८ =शकाब्दः १२२०) ताजकसारः (वैक्रमाब्दः १५८० =ख्रिस्ताब्दः १५२३ =शकाब्दः १४४५) गणेशदैवज्ञकृतं ग्रहलाघवम् (वैक्रमाब्दः १५७६ =ख्रिस्ताब्दः १५१९ =शकाब्दः १४४२) माधवस्य भास्वतीकरणोपरिटीका (वैक्रमाब्दः १५७६ =ख्रिस्ताब्दः १५१९ =शकाब्दः १४४२) ज्योतिर्दर्पणः (वैक्रमाब्दः १६५४ =ख्रिस्ताब्दः १५९७ =शकाब्दः १४७९) कमलाकरसिद्धान्तविवेकः (वैक्रमाब्दः १७१५ =ख्रिस्ताब्दः १६५८ =शकाब्दः १५८०)।

अस्य ग्रन्थस्य रङ्गनाथकृतगूढार्थप्रकाशिका (वैक्रमाब्दः १६६० =ख्रिस्ताब्दः १६०३ =शकाब्दः १५२५) नृसिंहदैवज्ञकृतं सौरभाष्यं (वैक्रमाब्दः १६७६ =ख्रिस्ताब्दः १६१९ =शकाब्दः १५४२) विश्वनाथदैवज्ञकृतागहनार्थप्रकाशिका (वैक्रमाब्दः १६८५ =ख्रिस्ताब्दः १६२८ =शकाब्दः १५५०) दादाभाईकृता किरणावलीटीका (वैक्रमाब्दः १७७६ =ख्रिस्ताब्दः १७१९ =शकाब्दः १६४१) च प्रसिद्धाः सन्ति।

### सोमसिद्धान्तः।

अस्य दृष्टा शौनकऋषिरिति मन्यते। अत्र सृष्टेरारम्भकालात् कलियुगारम्भपर्यन्तम् अहर्गणानयनं विशेषतया वर्तते। अस्य सिद्धान्तस्य कालः सूर्यसिद्धान्तस्य प्रायः समकालीनः स्विक्रीयते। अस्मिन् ग्रन्थे दशाऽध्यायाः पञ्चत्रिंशदधिकत्रिंशत् पद्यानि प्राप्यन्ते यत्र मध्यमाधिकारादि विषयाः सूर्यसिद्धान्तानुसारेण एव।

### वसिष्ठसिद्धान्तः।

अस्य वृद्धवसिष्ठसिद्धान्तोलघुवसिष्ठसिद्धान्तश्चेति परम्पराद्वयं प्राप्यते। प्रथमपरम्परायां वसिष्ठेन उपदिष्टस्य माण्डवस्य संक्षिप्तो ग्रन्थः प्राप्यते यत्र पञ्चाऽध्यायाः, एकोनपञ्चाशत् पद्यानि प्राप्यन्ते। अस्मिन् ग्रन्थे ग्रहाणां कक्षामानानि पातोवेध इत्यादि विषयाः पठ्यन्ते। मध्यमाधिकारः, स्पष्टाधिकारः, छायाधिकारः इत्यादीनि प्रकरणानि प्राप्यन्ते।

द्वितीयपरम्परायां वसिष्ठेन उपदिष्टस्य वामदेवस्य सिद्धान्तग्रन्थोऽपूर्णः प्राप्यते। तत्र केवलं सृष्टिसंस्थाग्रहाणाञ्च कक्षामानानि पठ्यन्ते। अत्र च पद्यानि अनुष्टुप् छन्दोबद्धानि।

## प्रथमा दृष्टिः।

### रोमेशसिद्धान्तः।

केनचित् दाक्षिणात्येन ज्योतिर्विदा रचिते रोमशसिद्धान्ते एकादशाध्यायाः चतुः सप्तत्यधिक-शतत्रयं पद्यानि वर्तन्ते। अयं सिद्धान्तो विष्णुप्रोक्तो विसष्ठ रोमशाभ्यां चाधित इति कथ्यते। अत्र कृष्णवेणीनद्यानाम्मोल्लेखः प्राप्यते। अत्र च भगणादिविषयाः सूर्यसिद्धान्तसमाना एव।

### शाकल्योक्तब्रह्मसिद्धान्तः।

ब्रह्मणोपदिष्टे नारदे गृहीतेस्मिन् सिद्धान्ते षडाध्यायाः चतुःषष्ट्यधिकसप्तशतपद्यानि विद्यन्ते। अस्मिन् सिद्धान्ते भगणादिविषयाः सूर्यसिद्धान्तसमाना एव। अत्र तृतीयाऽध्याये सूर्यचन्द्रयोः क्रान्तिसाम्यत्वं, धर्मशास्त्रसम्बन्धिविषयाः सन्ति। सौरमतानुसारेण प्रमाथि संवत्सरगणनया अयं ग्रन्थः वैक्रमाब्दात् ८७८ (=ख्रिस्ताब्दः ८२१ =शकाब्दः ७४३) परवर्ती मन्यते।

| क्रमाङ्कः। | नाम।<br>ग्रन्थकारः/कृतिः। | वैक्रमाब्दः। | ख्रिस्ताब्दः। | शकाब्दः। |
|---|---|---|---|---|
| ०१ | वराहमिहिरः। | २३ | ३४ पूर्वे | १२२ पूर्वे |
| ०२ | टॉलमी। | १९७ | १४० | ६२ |
| ०३ | आचार्यमीनराजः। | चतुर्थीशताब्दी | तृतीयशताब्दी | सार्द्धद्वितीयशताब्दी |
| ०४ | आर्यभट्टः। | ५३३ | ४७६ | ३९८ |
| ०५ | विष्णुगुप्तः। | ५६२ | ५०५ | ४२७ |
| ०६ | श्रीषेणः। | ५६२ | ५०५ | ४२७ |
| ०७ | ब्रह्मचन्द्रः। | ६५५ | ५९८ | ५२० |
| ०८ | लल्लः। | ६९५ | ६३८ | ५६० |
| ०९ | पद्मनाभः। | ८३५ | ७७८ | ७०० |
| १० | श्रीधरः। | ९१० | ८५३ | ७७५ |
| ११ | महावीरः। | ९१० | ८५३ | ७७५ |
| १२ | मनुः। | ९३५ | ८७८ | ८०० |
| १३ | बलभद्रः। | ९३५ | ८७८ | ८०० |
| १४ | पृथूदकः। | ९३५-१००७ | ८७८-९५० | ८००-८७२ |
| १५ | मुञ्जालः। | ९८९ | ९३२ | ८५४ |
| १६ | वित्तेश्वरः। | ९९४-११०५ | ९३७-१०४८ | ८५९-९७० |
| १७ | अल्बिरुनी। | ९९४-११०५ | ९३७-१०४८ | ८५९-९७० |

| | | | | |
|---|---|---|---|---|
| १८ | द्वितीयआर्यभट्टः। | १०१० | ९३५ | ८७५ |
| १९ | कल्याणवर्मा। | १०२३पूर्वे | ९६६पूर्वे | ८८८पूर्वे |
| २० | भट्टोत्पलः। | १०२३ | ९६६ | ८८८ |
| २१ | विजयनन्दी। | १०२३ | ९६६ | ८८८ |
| २२ | भानुभट्टः। | १०३५ | ९७८ | ९०० |
| २३ | श्रीपतिः। | १०९६ | १०३९ | ९६१ |
| २४ | वरुणः। | १०९७ | १०४० | ९६२ |
| २५ | श्रीभोजः। | १०९९ | १०४२ | ९६४ |
| २६ | भोजराजः। | १०९९ | १०४२ | ९६४ |
| २७ | राजादशबलः। | १११५ | १०५८ | ९८० |
| २८ | महेश्वरः। | ११३५ | १०७८ | १००० |
| २९ | ब्रह्मदेवः। | ११४८ | १०९१ | १०१४ |
| ३० | शतानन्दः। | ११५६ | १०९९ | १०२१ |
| ३१ | करणोत्तमग्रन्थः। | ११७३पूर्वे | १०८५पूर्वे | १०३८पूर्वे |
| ३२ | भास्कराचार्यः। | ११७७ | १११४ | १०३६ |
| ३३ | सोमेश्वरतृतीयः। | ११८८ | ११२९ | १०५१ |
| ३४ | अनन्तदेवः। | १२७९ | १२२२ | ११४४ |
| ३५ | केशवः। | १३०४ | १२४३ | ११६५ |
| ३६ | वाविलालः। | १३५५ | १२९८ | १२२० |
| ३७ | महादेवः। | १३७३ | १३१६ | १२३८ |
| ३८ | श्रीमन्त्रेश्वरः | १४००-१६०० | १४००-१६०० | १३००-१५०० |
| ३९ | महादेवः। | १४४२ | १३६४ | १२८६ |
| ४० | नार्मदः। | १४३५ | १३७८ | १३०० |
| ४१ | पद्मनाभः। | १४५५ | १३९८ | १३२० |
| ४२ | दामोदरः। | १४७४ | १४२७ | १३३९ |
| ४३ | गङ्गाधरः। | १४९१ | १४३४ | १३५६ |
| ४४ | मकरन्दः। | १५३५ | १४७८ | १४०० |
| ४५ | केशवोद्वितीयः। | १५५३ | १४९६ | १४१८ |
| ४६ | गणेशदैवज्ञः। | १५५५ | १४९८ | १४२० |
| ४७ | लक्ष्मीदासः। | १५५५ | १४९८ | १४२० |
| ४८ | कृपारामः। | १५५५परवर्तीनो | १४९८ परवर्तीनो | १४२० परवर्तीनो |
| ४९ | ज्ञानराजः। | १५६० | १५०३ | १४२५ |
| ५० | सूर्यदासः। | १५६५ | १५०८ | १४३० |
| ५१ | अनन्तः। | १५८२ | १५२५ | १४४७ |

| | | | | |
|---|---|---|---|---|
| ५२ | ढुण्ढीराजः। | १५८२ | १५२५ | १४४७ |
| ५३ | नृसिंहः। | १६०५ | १५४८ | १४७० |
| ५४ | अनन्तः। | १६१५ | १५५८ | १४८० |
| ५५ | रामचन्द्रः। | १६१७पूर्वे | १५६०पूर्वे | १४८२पूर्वे |
| ५६ | रघुनाथः। | १६२० | १५६२ | १४८४ |
| ५७ | रघुनाथः। | १६२३ | १५६५ | १४८७ |
| ५८ | दिनकरः। | १६३५ | १५७८ | १५०० |
| ५९ | नृसिंहः। | १६४३ | १५८६ | १५०८ |
| ६० | शिवः। | १६४५ | १५८८ | १५१० |
| ६१ | श्रीनाथः। | १६४७ | १५९० | १५१२ |
| ६२ | रामभट्टः। | १६४७ | १५९० | १५१२ |
| ६३ | कृष्णः। | १६५५ | १५९८ | १५२० |
| ६४ | मल्लारिः। | १६५९ | १६०२ | १५२४ |
| ६५ | रङ्गनाथः। | १६५९ | १६०२ | १५२४ |
| ६६ | रङ्गनाथः। | १६६० | १६०३ | १५२५ |
| ६७ | मुनीश्वरः। | १६०० | १६०३ | १५२५ |
| ६८ | दिवाकरः। | १६६३ | १६०६ | १५२८ |
| ६९ | विष्णुः। | १६६५ | १६०८ | १५३० |
| ७० | कमलाकरः। | १६६५ | १६०८ | १५३० |
| ७१ | नागेशः। | १६७६ | १६१९ | १५४१ |
| ७२ | विश्वनाथः। | १६८६ | १६२९ | १५५१ |
| ७३ | नित्यानन्दः। | १६९६ | १६३९ | १५६१ |
| ७४ | कृष्णः। | १७१० | १६५३ | १५७५ |
| ७५ | रत्नकण्ठः। | १७१५ | १६५८ | १५८० |
| ७६ | जयसिंहः। | १७५० | १६९३ | १६१५ |
| ७७ | जटाधरः। | १७६१ | १७०४ | १६२६ |
| ७८ | विद्दणः। | १७६९ | १७१२ | १६३४ |
| ७९ | दादाभट्टः। | १७७६ | १७१९ | १६४१ |
| ८० | चिन्तामणिदीक्षितः। | १७९३ | १७३६ | १६५८ |
| ८१ | शङ्करः। | १८२३ | १७६६ | १६८८ |
| ८२ | मणिरामः। | १८३१ | १७७४ | १६९६ |
| ८३ | मथुरानाथः। | १८३९ | १७८२ | १७०४ |
| ८४ | भुला। | १९६५ | १८०८ | १७३० |
| ८५ | राघवः। | १८६७ | १८१० | १७३२ |

| | | | | |
|---|---|---|---|---|
| ८६ | **दिनकरः।** | १८६९ | १८१२ | १७३४ |
| ८७ | **शिवः।** | १८७२ | १८१५ | १७३७ |
| ८८ | **यज्ञेश्वरः।** | १८९५ | १८३८ | १७६० |
| ८९ | **नृसिंहः।** | १८७८ | १८२२ | १७४३ |
| ९० | **विनायकः केरोलक्ष्मणोवा।** | १८८१ | १८२४ | १७४६ |
| ९१ | **विसाजीरघुनाथः।** | १८४४ | १८२७ | १७४९ |
| ९२ | **चिन्तामणिरघुनाथः।** | १८८५ | १८२८ | १७५० |
| ९३ | **कृष्णशास्त्रीगोडबोले।** | १८८८ | १८३१ | १७५३ |
| ९४ | **वेङ्कटेशबापूजीकेतकरः।** | १९१० | १८५३ | १७७५ |
| ९५ | **बालगङ्गाधरतिलकः।** | १९१३ | १८५६ | १७७८ |
| ९६ | **नीलाम्बरः।** | १९४० | १८८३ | १८०५ |

**वराहमिहिरः।** ज्योतिषशास्त्रस्येतिहास (हिन्दी)[३८] वराहमिहिरस्य नामातीव महत्त्वपूर्णमस्ति। वराहो वराहमिहिरो वराहमिहीर इत्यादिभिर्विविधरीत्या तस्योल्लेखो दृश्यते। तस्यपितुर्नाम आदित्यदासः। स एव तस्य गुरुरपि। पितापि ज्यौतिषशास्त्रनिष्णात आसीत्। कापित्थकनगरे सूर्योपासनया तेन पितुः सकाशात् ज्योतिषशास्त्रस्य ज्ञानं प्राप्तम्। अवन्तिकानगर्यां उज्जयिन्यां राज्ञः सम्मानं संप्राप्य राज्यसभां स्वपाण्डित्येनालंकृतवान्। विषयेऽस्मिन् बृहज्जातक उपसंहाराध्याये स्पष्टतयोक्तम्।

आदित्यदासतनयादवाप्तबोधः
    कापित्थके सवितृलब्धवरप्रसादः।
आवन्तिको मुनिमतान्यवलोक्यसम्य-
    ग्घोरां वराहमिहिरो रुचिरां चकार।। २८/९।।

एवमेव तेन निर्दिष्टम्-

दिनकरमुनिगुरुचरणप्रणिपातकृतप्रसादमतिनेदम्।
शास्त्रमुपसङ्गहीनं नमोऽस्तु पूर्वप्रणेतृभ्यः।। बृ.जा.२८/१०।।

तेन वराहमिहिरेण लघुजातकं बृहज्जातकं विवाहपटलं योगयात्रा पञ्चसिद्धान्तिका-इत्येते ग्रन्थाः प्रणीताः। एवं ज्योतिषशास्त्रस्य त्रिस्कन्धरूपस्य गणितं-संहिता-होरा इति त्रयाणामपि विषयाणामुपरि

---

[३८] भा.ज्यो.पृ.२९०-२९७।

वराहमिहिरस्य विवेचनं प्राप्यते। यद्यपि तस्य समयः प्रायेण ख्रिस्ताब्दात् ५०९ तः ५८५ पर्यन्तं षटशताब्द्यां मन्येत एवं दीक्षित महोदयाः स्वकीये "भारतीय ज्यौतिष का इतिहास (पृ. २९०)" लिखितं वर्तते। किन्तु महाकविकालिदासविरचिते ज्योतिर्विदाभरणाख्यग्रन्थे पद्यमेतत् पठ्यते।

धन्वन्तरिक्षपणकामरसिंहशङ्कुवेतालभट्टघटकर्परकालिदासाः।
ख्यातो वराहमिहिरो नृपतेः सभायां रत्नानि वै वररुचिर्नवविक्रमस्य।।

तत्र च महाकविना ग्रन्थरचनाकालो निर्दिष्टः।

वर्षैः सिन्धुदर्शनाम्बुगुणै ३०६८र्याते कलौ संमिते।
मासे माधवसंज्ञिते च विहितो ग्रन्थक्रियोपक्रमः।।

अस्याऽयमर्थः कलौ कलियुगे सिन्धुराः अष्टौ दिग्गजाः (८)
दर्शनानि षट् (६) अम्बरं शून्यमेव (०) गुणाश्च सत्त्वरजस्तमांसि त्रीणि (३)
(अत्र अङ्कानां वामतो गतिरीति न्यायेन ३०६८) वर्षैः सम्मिते याते गते........।

अधुना (वैक्रमाब्दात् २०६६ =ख्रिस्ताब्दात् २०१० =शकाब्दात् १९३१-१९३२ =कल्याब्दाः ५१११ तेभ्यः ३०३८ (ज्योतिर्विदाभरणस्य) अब्देषु निस्कासितेषु सत्सु २०४३ वैक्रमाब्दाः अवशिष्टाः। ते च यदा वैक्रमाब्देभ्यः २०६६ तः निष्कासिता यदा तदा ०२३ अवशिष्टाः। ख्रिस्ताब्दात् पूर्वे ३४ मिते वर्षे शकाब्दाश्च १२२ वर्षेभ्य पूर्वेऽस्य समयो निर्णीतो भवति। स एव महाकविकालिदास्य ज्योतिर्विदाभरणस्य रचनाकालो यः विक्रमादित्यस्य कालेन सहाऽत्यन्तम् सामिप्यं धारयति। अतः वराहमिहिरो महाकविकालिदासस्य विक्रमादित्यस्य च समकालीन एवेती न शङ्कालेशः।

बृहत्संहितायां सप्तोत्तरशतेषु अध्यायेषु विविधा विषया विचारिताः। ग्रहाणां चारादिकम्, प्रवर्षविचारः, अङ्गविद्या, वास्तुविचारः मूर्तिकलाविचारः, गन्धयुक्तिः, रत्नपरीक्षा, विविधपुरुषादि-लक्षणविचारः इत्यादया महत्त्वपूर्णा बहवो विषयाः पूर्वाचार्यविचाराननुसृत्य विवेचिताः। सिद्धान्ता संगृहीताः बृहज्जातके अष्टाविंशतितमे जातकविषयस्य होराविषयस्य वा विवेचनं दरीदृश्यते। पञ्चसिद्धान्तिकायां अष्टादशाध्यायेषु ४४२ श्लोकेषु खगोलविद्याविषयस्य पैतामह-वशिष्ठ-रोमक-पौलिश-सौर इति पञ्च सिद्धान्तानां विवरणं सम्प्राप्यते। विवाहपटलग्रन्थे विवाहस्य तथा योगयात्रायां

यात्राविषयस्य विवेचनं वराहमिहिरेण कृतम्। लघुजातकस्य श्लोकैके लघुजातकं नाम वराहस्यैवान्यो जातकविषयस्य होरायां वान्यः संक्षिप्तो ग्रन्थ इति सुस्पष्टं भवति।

होराशास्त्रे वृत्तैर्मया निबद्धे निरीक्ष्य शास्त्राणि।
यत्तस्याप्यार्याभिः सारमहं संप्रवक्ष्यामि।।

उत्पलेन व्याख्यायां वराहमिहिरस्य समाससंहितानामकस्य ग्रन्थस्योल्लेखः कृतः।

एवं ज्योतिषस्य प्रायेण सर्वं गणितं संहिता होरा अथवा खगोलज्योतिषं फलज्योतिषं च एतयोर्द्वयोरपि वराहमिहरेण विशिष्टं सम्पूर्णं च विवेचनं कृतम्।

**टोलेमी** (Ptolemy)। ग्रीसदेशस्य खगोलशास्त्रीणां एरिस्टोटलस्य (वैक्रमाब्दीयात् सार्द्धतृतीय शतकात् =ख्रिस्ताब्दीयात् चतुर्थशतकात् पूर्वे =शकाब्देः, पादोनपञ्चमशतकात् पूर्वं) एपोलोनियसः (वैक्रमाब्दीयात् द्वितीयार्द्ध शतकात् पूर्वे =ख्रिस्ताब्देः, सार्द्धतृतीयशतकात् पूर्वं =शकाब्दीयात् पादोनतृतीयशतकात्) हिपार्कसः (वैक्रमाब्दीये सार्द्धशतके =ख्रिस्ताब्दीये द्वितीयशतके =शकाब्दीये सपादप्रथमशतके) च अनुगामीति पठ्यते।[३९] टोलेमिनाऽपि पुरोगामीनां परम्परामनुसृत्य चन्द्रग्रहतारा-नक्षत्रादिनां भ्रमणादिगतिसिद्धान्तः प्रस्थापितोऽस्ति। तदानीन्तनानां मान्यतां पृथ्वीति समग्रसृष्टेः केन्द्रबिन्दु सर्वाणि च खगोलीय तेजपुञ्जानि मनुष्यसेवायां ईश्वरेणस्थापितानीति टोलेमीनाऽपि स्वीकृतमासीत्।

टोलेमीकृते एल्मजेस्टेतिग्रन्थे हिपार्कसेन्यऽसानञ्च सिद्धान्ताः समाविष्टाः सन्ति। समग्रसृष्टेः पृथ्वीकेन्द्रबिन्दुरिति टॉलमीसिद्धान्तः युरोपे आरबेषु च तथा स्वीकृतोऽचलद् यथा कोपरनिक्सनिकोलसेन (ख्रिस्ताब्दः १४७३-१५४३) सूर्यः केन्द्रबिन्दुरिति सप्रयोगं प्रस्थापितमिति आङ्ग्लकविना ज्हॉनमिल्टनेन स्वरचिते पॅरेडाइझ लोस्ट आख्ये काव्ये स एव टोलेमी सिद्धान्तः अन्तग्रथितः पठ्यते।

**आचार्यमीनराजः**। अस्य समयो विक्रमार्कस्य चतुर्थशताब्दी = ख्रिस्ताब्दस्य तृतीयशताब्दी = शकाब्दस्य च सार्द्धद्वितीय शताब्दी मन्यते। यवनोजातीयोऽयं विदेशीज्योतिर्विद् स्वकीये वृद्धयवनजातकाख्ये ग्रन्थे रणप्रदेशस्थ पशूनां उष्ट्रगर्दभादीनां नैकशो निर्देशैः पश्चिमभारतस्य सौराष्ट्रराजस्थानेति प्रदेशनिवासी इति स्वीक्रियते। अस्य ग्रन्थे ७१ प्रकरणेषु अष्टकवर्गफलविचारः सूर्यादिग्रहाणां दृष्टिविचारः लग्नादिभावेषु ग्रहाणां फलविचारः राजमार्गाः शकुनादि विषया वर्णिताः

[३९] गुजरातीविश्वकोशः, पृ. २२६। स्तभः प्रथमः (खण्ड-१ अ-आ)

सन्ति। अयं भारतीय संस्कृति प्रशंसको देवब्राह्मणानुरागीचाऽसीद्। अतएव मङ्गलचरणे ब्रह्मविष्णुमहेशादीनां नमस्कारान् कृतवान्।

**प्रथमआर्यभट्टः।** आर्यभट्टस्य समयो वैक्रमाब्द: ५३३ =ख्रिस्ताब्द: ४७६ =शकाब्द: ३९८ स्वीक्रीयते। तस्याऽऽर्यभट्टीयाख्यग्रन्थ: सर्वेषु प्राचीनेषु ज्यौतिषशास्त्रविषयकग्रन्थेषु अत्यन्तमहत्वं धारयति। तस्य रचनाकाल: शकाब्द: ४२१ (ख्रिस्ताब्द: ४९९) ज्ञायते। एतस्य द्वौ भागौ। प्रथमभागे प्रकरणमेकमेव तस्य मङ्गलाचरणं तस्य गीति श्लोका: अन्ते च संख्या परिभाषाश्लोका: इति सम्मिल्य १२ पद्यानि सन्ति। द्वितीये तु भागे त्रीणिप्रकराणाणि सम्मिल्य १०८ पद्यानि सन्ति। साम्प्रतं प्रचलितेषु सौरं आर्यं ब्राह्मचेत्याख्येषु त्रिषुज्योति:शास्त्रसिद्धान्तेषु मध्यमपक्ष आर्यभट्टस्यैव संक्षेपेणवस्तुनिर्देशार्थ-मार्यभट्टेन कादिवर्णानामकद्विन्त्रिचतुरिति स्वराणां च १-१०-१००-१००० इत्यादि ग्रहणं कृतं वर्तते। तस्यमते एकस्यमनो: महायुगानां संख्या ७१ प्रदत्ता[४०] प्रतिकल्पञ्च संधिकाल: स्विकृत:। तस्याऽऽर्य सिद्धांताख्ये ग्रन्थे चत्वार: पादा: सन्ति। तेषु (१) दशगीतिके ग्रहाणां भगणादिमानम्, (२) गणित अङ्कगणितबीजगणित-भूमिति-त्रिकोणमित्यादिविवेचनम् (३) कालक्रिया, (४) गोलाख्यपादे च ज्यौतिषशास्त्रविषयकं गणितं दृश्यते।

**विष्णुचन्द्रः।** विष्णुचन्द्र: वराहमिहिरस्य (वैक्रमाब्दात् २३ = ख्रिस्ताब्दात् ३४पूर्वे =शकाब्दात् १२२ पूर्वे) परवर्ती। ब्रह्मगुप्तस्य (वैक्रमाब्दात् ६५५ = ख्रिस्ताब्दात् ५९८ = शकाब्दात् ५२०) पूर्ववर्ती मन्यते।[४१] अत: श्रीषेणस्य समकालीन।

**श्रीषेणः।** श्रीषेण: वराहमिहिरस्य वैक्रमाब्दात् २३ =ख्रिस्ताब्दात् ३४ पूर्वे =शकाब्दात् १२२ पूर्वे परवर्ती ब्रह्मगुप्तस्य (शकाब्दात् ५२० =ख्रिस्ताब्दात् ५९८ =वैक्रमाब्दात् ५६२) च पूर्ववर्ती मन्यते।[४२]

**ब्रह्मगुप्तः।** ब्रह्मगुप्तस्य जन्मकालो वैक्रमाब्द: ६५५ =ख्रिस्ताब्द: ५९८ = शकाब्द: ५२० स्विक्रीयते। तस्य पिता जिष्णुरिति ज्ञायते। स च मारवाडप्रान्तस्य भीमपालनिवासी। तस्य

---

४० यत्प्रग्द्वादशसाहस्रमुदितं दैविकं युगम्।
तदेकसप्ततिगुणं मन्वन्तरमिहोच्यते।। मनुस्मृति प्र. अ. ७९।।

४१ विशेषार्थं श्रीशङ्करबालकृष्णदीक्षितस्य भारतीयज्योतिषेत्यत्र पृ. २९७ द्रष्टव्यम्।

४२ विशेषार्थं श्रीशङ्करबालकृष्णदीक्षितस्य भारतीयज्योतिषेत्यत्र पृ. २९७ द्रष्टव्यम्।

ब्रह्मसिद्धान्ताख्यस्य ग्रन्थस्य रचनाकालः शकाब्दः ५५० (ख्रिस्ताब्दः ६२८) इति प्राप्यते। तस्य खण्डखाद्यस्य रचनाकालः शकाब्दः ५८७ (ख्रिस्ताब्दः ६६५) इति लभ्यते।

अरबदेशवासिनः टोलमी (ख्रिस्ताब्दः ९५०) महोदयस्य ज्यौतिषशास्त्रविषयकग्रन्थस्य पठनादपूर्वं ब्रह्मगुप्तस्य शकाशात् ज्यौतिषशास्त्रं पठितवन्त इति अलबेरुनी (ख्रिस्ताब्दः ९५०) महाशयेन स्पष्टमुल्लिखितम्। तुरीययंन्त्राविष्कारो ब्रह्मगुप्तस्य स्वतन्त्रो वैयक्तिकस्य स्विक्रीयते। सूर्यचन्द्र-चन्द्रोच्चादि भगणादिमानं, सौरमासचान्द्रमासादिमानं वेधादिविवेकज्ञानं च प्राप्यन्ते।

अत्र २४ (चतुरविंशत्यध्यायेषु) १००८ आर्याषु अङ्कगणितं, बीजगणितं, यन्त्रज्ञानं क्षेत्रफलज्ञानं, ग्रहाणां मध्यमाधिकारो योगाद्युन्नयनं चेत्यादि विषयाः वर्णिताः।

खण्डखाद्यग्रन्थे पूर्वाधिकारे उत्तराधिकारे च सम्मिलय १४ अधिकाराः सन्ति, तत्र च १६५ आर्याछन्दोबद्धपद्यानि सन्ति। मूलसूर्यसिद्धान्तानुसारेण वर्षस्यमानं स्वीकृतं दृश्यते। एतस्मिन् ग्रन्थे वरुणस्य (शकाब्दः ९६२) भट्टोत्पलस्य (शकाब्दः ८८८) च टीकाद्वयं प्राप्यते।

**लल्लः।** ज्योतिर्विदो लल्लस्य जन्मसमयो वैक्रमाब्दः ६९५ = ख्रिस्ताब्दः ६३८ = शकाब्दः ५६० मन्यते। तस्य (१) श्रीवृद्धिदतन्त्रे ग्रहगणितविषयकं वस्तु वर्तते। (२) रन्तकोषाख्यमूलग्रन्थे मुहूर्तविषयो वर्तते स च वेधानवेषको यः, प्रथमार्यसिद्धान्तं संस्कृत्यनूतनग्रहानयनं स्थापितवान्।

**पद्मनाभः।** तस्य समयः पूर्ववर्ति-पश्चात्वर्ति ज्योतिर्विदाम् उल्लेखानुसारेण वैक्रमाब्दः ८३५ = ख्रिस्ताब्दः ७७८ = शकाब्दः ७०० अस्ति।[४३] तत्प्रणीतो ग्रन्थोऽधुना न प्राप्यते किन्तु भास्कराचार्यादीनां ग्रन्थेषु तस्य नामोल्लेखः प्राप्यते।

**श्रीधरः।** महावीरस्य सारसंग्रहे श्रीधरस्य पद्यानां निर्देशादस्य समयो वैक्रमाब्दात् ९१० =ख्रिस्ताब्दात् प्राक् ८५३ = शकाब्दात् ७७५ तः भवितुमर्हति। अङ्कगणितं क्षेत्रगणितं पाटीगणितं जातकपद्धतिश्चेति ग्रन्थचतुष्टयं तस्य नाम्ना सङ्केतितम्। एतेन स्वकीयेषुग्रन्थेषु विभिन्ना एव संज्ञाः स्तम्भोदेशः (=इष्टकर्म) गुणनं (=प्रत्युत्पन्नम्) इति स्वीकृताः।

---

[४३] विशेषार्थं श्रीशङ्करबालकृष्णदीक्षितस्य भारतीयज्योतिषेत्यत्र पृ. ३१४ द्रष्टव्यम्।

**महावीरः।** तस्य समयो वैक्रमाब्दः ९१० =ख्रिस्ताब्दः ८५३=शकाब्दः ७७५ वर्तते। अयं जैनधर्मावलम्बी राष्ट्रकूटवंशीयस्य जैननृपस्याऽमोघवर्षस्य राज्याश्रितः आसीत्। तस्य सारसंग्रहाख्यो ग्रन्थोऽङ्कगणितक्षेत्रगणितादि विषयवस्तु समाश्रयते।

**मनुः।** अस्य समयो वैक्रमाब्दात् ९३५ =ख्रिस्ताब्दात् ८७८ = शकाब्दात् ८०० प्राग् भवितुमर्हति यतोऽस्य बृहन्मानसकरणाख्ये ग्रन्थे भट्टोत्पलस्य (वैक्रमाब्दः १०२३ =ख्रिस्ताब्दः ९६६ = शकाब्दः ८८८) टीका प्राप्यते। अथ च अलबेरुनी (वैक्रमाब्दः ९९४-११०५ = ख्रिस्ताब्दः९३७-१०४८ शकाब्दः८५९-९७०) निर्दिशति यत् मुञ्जालेन (वैक्रमाब्दः९८९ = ख्रिस्ताब्दः ९३२ = शकाब्दः ८५४) बृहन्मानसकरणस्य लघुमानसं रचितवान्।

**बलभद्रः।** कनैज स्थाण्वीश्वरः (आधुनिकं थानेश्वर) प्रान्तनिवासी ज्यौतिषशास्त्राचार्यस्य समयो वैक्रमाब्दः ९३५ = ख्रिस्ताब्दः ८७८ =शकाब्दः ८०० विद्वद्भिः निश्चीयते यतः भट्टोत्पलेन (वैक्रमाब्दः १०२३ ) टीकाकारेण पृथूदकेन (वैक्रमाब्दः ९३५-१००७) अलबेरुनिना च (वैक्रमाब्दः ९९४-११०५) बलभद्रस्य आर्यापद्यानि, अनुष्टुप् श्लोकाश्च प्रचूरतया स्वीकृताः। यस्य ग्रन्थानां एकस्यापिप्राप्तिरधुना नास्ति।

**पृथूदकः।** अस्य अपरनाम पृथूदकस्वामी [४४] । मधुसूदनोऽस्य पिता। खण्डखाद्यस्य टीकाकारो वरुणः (वैक्रमाब्दः १०९७) पृथूदकं नाम्ना निर्दिशति। अलबेरुनी (वैक्रमाब्दः ९९४-११०५) एनं ज्योतिषग्रन्थकारः इति निर्दिशति। पृथूदकेन च बलभद्र (वैक्रमाब्दः ९३५) ब्रह्मसिद्धान्तटीकायां नैकश उद्धृतः। द्वितीयाऽर्यभट्टस्य (वैक्रमाब्दाः १०१०) ग्रन्थे पृथूदकस्य नामोल्लेखोऽपि न दृश्यते। अतः पृथूदकस्यकालो वैक्रमाब्दः ९३५-१००७ =ख्रिस्ताब्दः ८७८-९५०=शकाब्दः ८००-८७२ समयः मध्यवर्ती। द्वितीय आर्यभट्टस्य समकालीनो भवेत्।

**मुञ्जालः।** मुञ्जालभट्टो लघुमानसं विरचितवान्। स भारद्वाजीगोत्रीयो दाक्षिण्यात्यो ब्राह्मणः आसीत्। तेनैव ग्रन्थारम्भे लिखितम्।

---

[४४] श्रीशङ्करबालकृष्णदीक्षितमहोदयः स्वकीये भारतीय ज्योतिषशास्त्रेऽति ग्रन्थ (पृ. ३२३) स्वामी शब्दस्य प्रयोगात् एनं चतुर्थाश्रमी सन्यासीति मन्यते।

**प्रथमा दृष्टिः।**

प्रकाशादित्यवत् ख्यातो भारद्वाजो द्विजोत्तमः।
लघुपूर्वं स्फुटोपायं वक्ष्येऽन्यल्लघुमानसम्।।

ज्यौतिषशास्त्रविषयकान् अत्यंतमहत्त्वपूर्णान् सिद्धान्तान् प्रस्थाप्य स विलक्षणोऽन्वेक्षकः चिन्तनशीलश्चेति बहुमन्यते। तस्य समयो वैक्रमाब्दः ९८९ = ख्रिस्ताब्दः ९३२= शकाब्दः ८५४ इति निश्चीयते यतोऽबेरुनी (वैक्रमाब्दः ९९४-११०५) लिखति यत् स बृहन्मानसस्य लघुमानसाख्यो ग्रन्थः विरचितवान् यत्र ६० अनुष्टुप् छन्दोबद्धाः श्लोका इति गणकतरङ्गिणीकाराणां (वैक्रमाब्दाः ९८९) वचनम्। कोलब्रूकोपि तमेव समयं स्वीकरोति। उत्तरकालवर्ती भास्कराचार्यः (वैक्रमाब्दः ११७७) मुञ्जालभट्टस्यैव अयनगति मनुसरति।

लघुमानसाख्ये ग्रन्थे (१) मध्यमः, (२) स्पष्टः (३) तिथिसाधनप्रकारः (४) त्रिप्रश्नाः (५) ग्रहयुतिः (६) सूर्यग्रहणम् (७) चन्द्रग्रहणम् (८) शृङ्गोन्नति रित्यादयोधिकाराः सन्ति।

**वित्तेश्वरः।** वित्तेश्वरः काश्मीरनिवासी भदत्त(भीदत्त)स्य पुत्र आसीत्। अलबेरुनिना (वैक्रमाब्दः ९९४-११०५ = ख्रिस्ताब्दः ९३७-१०४८ = शकाब्दः ८५१-९७०) वित्तेश्वरेतिनाम्ना[४५] उल्लेखः कृतः। अतः तस्य समयो वैक्रमाब्दः ९५६ = ख्रिस्ताब्दः ८९९= शकाब्दः ८२१ योग्य एव भवति।

**अलबिरुनी।** अर्वाचीनोझ्बेकिस्तानस्य तत्कालीनखारिझमराज्यस्य काथापरनाम्नां कासेत्याख्य जिलायां बेरुनगरे अबूरेहानमहम्मद इति नाम्ना जातोऽसौ अहमदस्य पुत्रः आसीत्। अलबेरुनीति नगरनिवासेत्यनाऽस्य नाम प्रतिभाति सोऽयमरबस्तानीयः। तस्य समयो वैक्रमाब्दाः ९९४-११०५ = ख्रिस्ताब्दः ९७३-१०४८ = शकाब्दाश्च ८५१-९७०[४६] प्राप्यन्ते। अयं ज्योतिर्विद् इतिहासकारश्चेति प्रसिद्धः। तस्य गुरोः मन्सूर इति। एतेन 'रे-पर्वते' वेधशाला स्थापिताऽऽसीत् । अनेन १०५४ वैक्रमाब्दस्य वैशाखीपूर्णिमायां[४७] कासनगरे जातेन चन्द्रग्रहणेन तस्य स्थलस्य रेखांशो निर्णीतः।

अलबेरुनिना विरचिते अथ-हरल-बकीयाहेति प्राचीन राष्ट्रवंशावेलीतिहास ग्रन्थे अष्टमशताब्द्यां प्राप्तानि पञ्चाङ्गानि, दशांशसङ्ख्या, खगोलनिरीक्षणानि तथा च तत्कालीन सांस्कृतिकादि वृत्तान्तानि प्राप्यन्ते। १०७९ वैक्रमाब्दे गुजरातस्य विख्यात सोमनाथज्योतिर्लिङ्गस्योपरि महम्मदगजनी

---

[४५] ज्यौतिषशास्त्र का इतिहास पृ. ३१७

[४६] गुजराती विश्वकोशे (खण्डम्-१ अ-आ), पृष्ठम्-४८७, स्तम्भः २

[४७] विशेषस्तु गुजराती विश्वकोशे २४--९९७ इति आङ्ग्ल दिनाङ्कः प्रदत्तोऽस्ति।(खण्डम्-१ अ-आ)

आक्रमणकाले अलबेरुनी गजनिना सह भारतदेशमायात:। ततश्च भारतभूमौ निवसन् संस्कृतवाङ्मयाभ्यासकर्ता प्रथमोयं मुस्लीमोजन इति प्रख्यात:। १०८१ वैक्रमाब्दे अलबेरुनी तुर्कीयै: वणिजै: सम्पर्कमाप्य उत्तरध्रुवीय प्रदेशेषु षण्मासिकदिवसस्य तावत्कालीनरात्रेश्च रहस्यमपिज्ञात्वा लिखितवान् स अरबी-तुर्की-हिब्रू-सिरियेकी-संस्कृतं चैतासा भाषाणां प्रभूत्वमधारयत्। स विधविधविषयेषु नैकान् ग्रन्थान् रचयामास तेभ्य: २७ ग्रन्थाऽवाद्य प्राप्यन्ते।[४८]

**द्वितीय आर्यभट्ट:।** अलबेरुनी (वैक्रमाब्द: ९९४-११०५ =ख्रिस्ताब्द: ९३७-१०४८=शकाब्द: ८५१-९७०) निर्दिष्टोऽयं कुसुमपुरनिवासी ज्योतिर्विद्। तस्य समयो वैक्रमाब्द: १०१० =ख्रिस्ताब्द: ९५३=शकाब्द: ८७५ निश्चीयते। तस्य ग्रन्थनाम्नि लघुसिद्धान्तेऽस्मिन् १८ अध्याया: प्राय: ६२५ आर्या: सन्ति। अत्र करणग्रन्थविषया: गोलविषया: पाटीगणितं भुवनकोषग्रहाणां मध्यमगति: बीजगणितं कुटुम्बगणितम् चेत्यादिविषया: चर्चिता:।

**कल्याणवर्मा।** अस्य समयो वराहमिहिरस्य (वैकमाब्द: २३ = ख्रिस्ताब्द: ३४ पूर्वे = शकाब्द: १२२ पूर्वे[४९]) पश्चातवर्ती भट्टोपला (वैक्रमाब्द: १०२३ = ख्रिस्ताब्द: ९६६ = शकाब्द: ८८८) च प्राक् प्राप्यते। अयं गुराजप्रान्तस्य पाटणनगर समीपवर्तिव्याघ्रपल्लीश्वर (व्याघ्रपदीश्वर) निवासी। अनेन सारावली इत्याख्यो ग्रन्थो रचितोयत्र २५०० आर्या छन्दोबद्धा: श्लोका: प्राप्यन्ते तत्र ५५ प्रकरणेषु राशिभेदो ग्रहगुणोयोगकारकोऽरिष्ट विचारो द्विग्रहयुतिस्त्रिग्रह युति: पञ्चग्रहयुति: प्रवज्यायोगोनाभसयोगश्चेत्यादि विषया वर्णिता: सन्ति।

**भट्टोत्तपल:।** प्राय: काश्मीरनिवासी ज्योतिषशास्त्रस्योऽयं प्रकाण्ड: पण्डित:। स प्राचीन ज्योतिषग्रन्थानां सिद्धान्तान् स्वलिखितासु टीकासु पूर्णतया उद्धतवान्। वराहमिहिरविरचित बृहज्जातकग्रन्थस्य टीकायां वस्वष्टाष्टति (८८८) निर्देशेनाऽस्य समयो वैक्रमाब्द: १०२३ =ख्रिस्ताब्द: ९६६ = शकाब्द: ८८८ स्वीक्रियते। एतेन गणितस्कन्ध: २. प्रश्नग्रन्थ:, ३. राहुन्नाकरणम्, ४. कर्णपातश्च स्वतन्त्रगन्था:, ५. बृहज्जातकटीका, ६. यात्राटीका, ७. लघुजातकटीका, ८. बृहत्संहिताटीका, ९. बृहन्मानसटीका, १०. षट्पञ्चाशिकाटीका च विरचिता:।

---

[४८] विशेषसर्थ गुजराती विश्वकोशे पृ. द्रष्टव्यम्।

[४९] ज्योतिशास्त्रेतिहासकाराणां शङ्करबालकृष्णदीक्षितानां निश्चितसमयानुसारेणाऽयं समय: प्रदत्त:।

## प्रथमा दृष्टिः।

**विजयनन्दी।** अस्यकाल: प्रायो वैक्रमाब्द: १०२३ =ख्रिस्ताब्द: ९६६=शकाब्द: ८८८ मन्यते। अयं काशीनिवासी ज्योतिर्विद्। अस्य करणतिलकाख्येग्रन्थे अहर्गणं, मध्यमग्रहसाधनं, रविचन्द्रबिम्ब-साधनम्, महापातगणितम् च इत्यादि विषया: सन्ति।

**भानुभट्टः।** अस्याऽपरनाम भानुयशो वा भानुरजो वा भवेत्। वरुण: (वैक्रमाब्द: १०९७ =ख्रिस्ताब्द: १०४०=शकाब्द: ९६२) स्वटीकायां भानुभट्टस्य उद्धरणानि ददाति। अतोऽस्य समय: प्रायो वैक्रमाब्द: १०३५ =ख्रिस्ताब्द: ९७८=शकाब्द: ९०० मन्यते। अधुनाऽस्य ग्रन्थो न प्राप्यते।

**श्रीपतिः।** अयं ज्योतिर्विद् कश्पगोत्रोत्पन्न: केशवपौत्रो नागदेवसूनुश्चेति। अस्य समयो वैक्रमाब्द: १०९६ =ख्रिस्ताब्द: १०३९=शकाब्द: ९६१ इति रत्नमालाटीकाकारेण महादेवेन लिखितं वर्तते। एतेन सिद्धान्तशेखरे धीकोटिदकरणं रत्नमाला, जातकपद्धति: रत्नासारश्चेति ग्रन्था: रचिता:।

**वरुणः।** अस्य समयो वैक्रमाब्द: १०९७ =ख्रिस्ताब्द: १०४०=शकाब्द: ९६२। अयं काश्मीरप्रान्ते उरुषाजिलाया: चोरेय्याटसरीखेग्रामवासी। अस्य च एतेन ब्रह्मगुप्त विरचित खण्डखाद्यग्रन्थस्य टीका रचितेति प्राप्यते।

**श्रीभोजः। (राजमृगाङ्कः)** अस्य समयो वैक्रमाब्द:१०९९ =ख्रिस्ताब्द: १०४२=शकाब्द: ९६४। केचन विद्वांस: एवं भोजराज: एते कथयन्ति किन्तु धारानरेशस्य भोजराजस्य समय: ख्रिस्ताब्द: १०००-१०५५ सर्वस्वीकृत:। राजमृगाङ्के प्राप्तानि पद्यानि ब्रह्मगुप्तस्य (वैक्रमाब्द: ६५५ =ख्रिस्ताब्द: ५९८=शकाब्द: ५२०) ब्रह्मसिद्धान्तग्रन्थाद् उद्धृतानि अस्य च राजमृगाङ्कस्य कतिचिद् पद्यानि महादेवीसारण्यां (वैक्रमाब्द: १३७३ =ख्रिस्ताब्द: १३१६=शकाब्द: १२३८) प्राप्यन्ते। अत: श्रीभोजस्य भोजराज इति न युक्तम्।

**भोजराजः।** सम्भवत: प्रमारवंशीयोऽयमिति ज्ञायते। अस्य समयो वैक्रमाब्द: १०९९ =ख्रिस्ताब्द: १०४२=शकाब्द: ९६४ इत्यनुमीयते। यतोऽनेन रचित ग्रन्थस्योल्लेखो महादेव (शकाब्द: ११८५) कृतटीकायां प्राप्यते। अस्य ग्रन्थस्तु न प्राप्यते।

## प्रथमा दृष्टिः।

**राजादशबलः। (कमलाकरमार्तण्डः)** अस्य समयो वैक्रमाब्दः १११५ =ख्रिस्ताब्दः १०५८=शकाब्दः ९८०। वल्लभवंशीयो विरोचनसूत आसीत्। अस्य ग्रन्थनाम कमलाकरमार्तण्ड इति। तत्र मध्यमाधिकारः स्पष्टाधिकारस्त्रिप्रश्नाधिकारश्चन्द्रग्रहणमित्यादि विषया वर्णिताः सन्ति।

**महेश्वरः।** शाण्डिल्यगोत्रोत्पन्नोऽयं मनोरथस्य पुत्रः प्रभाकरस्य पौत्रो गोविन्दस्य च प्रपौत्रः ज्योतिर्विदामग्रगण्यस्य भास्कराचार्यस्य पिता। अस्य समयः प्रायो वैक्रमाब्दः ११३५ =ख्रिस्ताब्दः १०७८=शकाब्दः १००० मन्यते। अनेन शेखराख्यकरणग्रन्थः, लघुजातकटीका, प्रतिष्ठादीपकश्चेति ग्रन्था रचिताः। तेषां रचनाकालस्य वैक्रमाब्दः ११६५-११७५ =ख्रिस्ताब्दः ११०८-१११८=शकाब्दः १०३० तः १०४० निश्चीयते।

**ब्रह्मदेवः।** मथुरानिवासी चन्द्रनामकपितुः पुत्रः। अयं करणप्रकाशः इति ग्रन्थस्य रचयिता। अस्य समयो वैक्रमाब्दः ११४८=ख्रिस्ताब्दः १०९१=शकाब्दः १०१४ मन्यते। अस्मिन् ग्रन्थे मध्यमाधिकारः, स्पष्टाधिकारः पञ्चतारास्पष्टाधिकारः चन्द्रग्रहणम्, सूर्यग्रहणम्, उदयास्तविचारः, शृङ्गोन्नतिः, ग्रहयुत्यधिकारः, एते ग्रहयुत्य विषयाः वर्णिताः सन्ति।

ग्रहलाघवकारेण ग्रहाणां आर्यपक्षानुसारेण स्वीकृताः सिद्धान्ताः करणप्रकाशदेव गृहीता इति सर्वसम्मतम्।

**शतानन्दः।** अस्य ज्योतिर्विदः समयो वैक्रमाब्दः ११५६ =ख्रिस्ताब्दः १०९९=शकाब्दः १०२१ अस्ति। जगन्नाथपुरी वास्तव्योऽयं वैष्णव आसीत्। अस्य ग्रन्थस्य नाम भास्वतीकरणम्। अस्य अष्टाधिकारेषु षष्टिश्लोका यत्र तिथिग्रहध्रुवा त्रिप्रश्नाः, सूर्यग्रहणं, चन्द्रग्रहणं चेत्यादि विषयाः वर्णिताः सन्ति। अत्र मध्यमग्रहसाधनं वर्षगणमानेन स्थापितम्। यत्र क्षेपकस्य ग्रहगतेश्च गुणनभाजनसंस्कारः शतांशपद्धत्यां दशितः। एतद् ग्रन्थोपरि माधवस्य (वैक्रमाब्दाः १५७६ =ख्रिस्ताब्दाः १५१९=शकाब्दाः १४४२) अनिरुद्धस्य (वैक्रमाब्दाः १५५२ =ख्रिस्ताब्दाः १४९५=शकाब्दाः १४१७) टीकाद्वयं प्राप्यते।

## प्रथमा दृष्टिः।

**अज्ञातकर्तृकः करणोत्तमो ग्रन्थः।** अस्य ग्रन्थस्य रचनाकालो वैक्रमाब्दात् ११७३ (=ख्रिस्ताब्दात् १०८५=शकाब्दात् १०३८) पूर्वीयो मन्यते यतोऽस्य नामोल्लेखो रत्नमालायाः महादेवकृतटीकायां प्राप्यते (महादेवस्य समयो वैक्रमाब्दः १३२० निश्चितोऽस्ति।)

**भास्कराचार्यः।** ज्योतिर्विदां मूर्धन्यस्य शाण्डिल्यगोत्रोत्पन्नस्य ज्योतिर्विदो भास्कराचार्यस्य समयो वैक्रमाब्दः ११७७ =ख्रिस्ताब्दः १११४=शकाब्दः १०३६ प्रसिद्धोऽस्ति। अयं सह्याद्रिसमीपस्थ विज्जड्विडीति ग्रामनिवासी। अस्य पिता महेश्वरोऽपि (गतक्रमाङ्कः२८) महान् ज्योतिर्विदासीत्। भास्कराचार्यस्य पौत्रः चङ्गदेव इति ख्यातोऽस्य परिचयः खानदेशस्य पारणग्रामे प्राप्तशिलालेखानुसारं प्रायो द्वादशशताब्दी प्राप्यते।

लीलावतीनाम्नाप्रसिद्धो ग्रन्थो (२७८ पद्यानि) भास्कराचार्यस्य वैक्रमाब्दे १२०७ (ख्रिस्ताब्दे ११५०=शकाब्दे १०७२) लिखितस्य सिद्धान्तशिरोमणिरित्यस्य महाग्रन्थस्य प्रथमखण्डोऽस्ति यश्चाध्यायोऽपि कथ्यते। तत्राऽन्ये त्रयोऽध्यायाः खण्डा वा प्राप्यन्ते। अस्मिन् ग्रन्थे परिक्रमाष्टकं, पूर्णाङ्कयोगाः, ऋणफलपद्धतिः, पूर्णापूर्णाङ्करूपं, वर्गतन्मूलं, घनतन्मूलानि परार्धादि संख्यानामानि। अहर्गणसाधनम्, मध्यमाधिकारः स्पष्टाधिकारः बीजगणितस्य, धनार्णयोगाः विविधानिसमीकरणानि कुट्टकगणितम्, गणिताध्यायो गोलाध्यायश्चेति विषयाणां चर्चा विद्यते। यद्यपि सिद्धान्तशिरोमणौ ब्रह्मगुप्तसिद्धान्तविविधनामानि, राजमृगाङ्काश्च बीजसंस्काराः गृहीतास्तथापि इष्टदिगादि छायासाधनं स्वतन्त्रमेवभाति।

अस्य ग्रन्थस्य वासनाभाष्यमिति स्वोपज्ञटीका ततश्च सूर्यदासस्य (वैक्रमाब्दः १५९८ =ख्रिस्ताब्दः १५४१=शकाब्दः १४६३) रङ्गनाथस्य (वैक्रमाब्दः १७१५ =ख्रिस्ताब्दः १६५८=शकाब्दः १५८०) मितभाषिणीत्येकेत्याद्या नैकटीकाग्रन्थाः वर्तन्ते। भास्कराचार्येण करणकुतूहलम् इति ग्रन्थो वैक्रमाब्दे १२४०(ख्रिस्ताब्दे ११८३ =शकाब्दे ११०५) विरचितो यत्र दशाध्यायेषु १३९ पद्यानि सन्ति। अस्मिन् ग्रन्थे मध्यमाधिकारः, स्पष्टाधिकारः, त्रिप्रश्नाधिकारः, सूर्यग्रहणं, चन्द्रग्रहणं, उदयास्तविचारः, शृङ्गान्नतिश्चेत्यादि विषयाः प्राप्यन्ते।

**सोमेश्वरस्तृतीयः।** उत्तरचालुक्यवंशीयस्याऽस्य भूलोकमल्लः सर्वज्ञभूपालश्चेति नामद्वयं इतिहासे प्रसिद्धम्। तस्य समयो वैक्रमाब्दः ११८८ =ख्रिस्ताब्दः ११२९=शकाब्दः १०५१ प्राप्यते।

## प्रथमा दृष्टिः।

अस्यैवग्रन्थो मानसोल्लासोऽभिलषितार्थचिन्तामणिरिति नामाभ्यां प्रचलितः। अस्मिन् ग्रन्थे प्रतिपादितविषयेषु ज्यौतिषशास्त्रविषयकोल्लेखोऽपि प्राप्यते। यत्राऽहर्गणविषयो महत्त्वपूर्णो वर्तते।

**अनन्तदेवः।** अयं ज्योतिर्विदभास्कराचार्यस्य वंशज इति ज्ञायते। बहालग्रामनिवासितोऽस्य समयो वैक्रमाब्दः १२७९ =ख्रिस्ताब्दः १२२२=शकाब्दः ११४४ निश्चीयते। अनेन ब्रह्मगुप्तसिद्धान्तस्य छन्दश्चित्युत्तर नामकस्य विंशतितमाध्यायस्य उपरि बृहज्जातकस्य चोपरि टीकाद्वयं लिखितम्।

**केशवः।** गुजरातराज्यस्य नर्मदातटे विराजमानस्य भृगुकच्छप्रदेशस्य(भरुचः) निवासी भारद्वाजगोत्रोत्पन्नो ज्योतिर्विद् यस्य प्रपितामहो जनार्दनः पितामहः श्रियादित्य पिता च रणग इति प्रसिद्धः। अस्य समयो वैक्रमाब्दः १३०४ =ख्रिस्ताब्दः १२४३=शकाब्दः ११६५ इति ज्ञायते।

औदिच्यज्ञाति यस्याऽस्य ग्रन्थो विवाहवृन्दावनो नाम अस्य ग्रन्थस्योपरि ग्रहलाघवकारस्य गणेशदैवज्ञस्य टीका वर्तते। अपरं च पीताम्बरकृत निर्णयामृतटीकायामस्य ग्रन्थस्य उल्लेखः प्राप्यते।

**वाविलालः।** तैलङ्गणदेशीयस्याऽस्य समयः वैक्रमाब्दः १३५५ =ख्रिस्ताब्दः १२९८=शकाब्दः १२२० इत्यनुमीयते यतोऽस्य ग्रन्थो न प्राप्यते किन्तु तस्य करणग्रन्थगतक्षेपकस्याऽनुसारेण वर्तमानेऽपि काले तैलङ्गणे सिद्धान्तचान्द्रपञ्चाङ्गग्रन्थाः रच्यन्ते।

**महादेवः।** अस्य ज्योतिर्विदः समयो वैक्रमाब्दः १३७३ =ख्रिस्ताब्दः १३१६=शकाब्दः १२३८ आसीत्। गोदावरीसमीपस्थ रासिनग्रामनिवासीनोऽस्य गौतमगोत्रोत्पन्नस्य पितामहः माधवः पिता च पद्मनाभ ब्राह्मणज्ञातीयोऽस्य संभवतः गुजरातप्रान्तीयो यतोऽनेन स्वकीयायां महादेवसारण्यां ग्रहसिद्धौ वा ४ १/२ पलभामानं[५०] स्वीकृतं वर्तते। अनेनैव ज्योतिर्विदो चक्रधरेण विरचितायाः ग्रहसिद्धिरीत्याख्याः अपूर्णरचनायापूर्णता कृता। अस्मिन् ग्रन्थे ४३ पद्यानि सन्ति। मध्यमस्पष्टग्रहानयनप्रकारः पठ्यते।

**श्रीमन्त्रेश्वरः।** अयं नम्बुद्री ब्राह्मणो दक्षिणभारतस्य तमिलप्रन्तस्य शालवीटीग्रामनिवासी आसीत।अस्य कलो विक्रमस्य खिस्ताब्दस्य च चतुर्दश-षोडशशतके=शकस्य त्रयोदश-पञ्चदशतके·

---

[५०] सामान्यतः ४.१/२ तः ०५ पर्यन्तं पलभामानं गुर्जरराज्यस्यसूर्यपुरनगरस्य(सूरत) समीपवर्तिनः प्रदेशस्य गृह्यते विशेषस्तु गणेशदैवज्ञस्य ग्रहलाघवपुस्तके पृ.२५८ दृष्टव्यम्।

प्राप्यते। अनेन फलदीपिका नामकहोरा ग्रन्थस्य रचनाकृता। अत्र सप्तविसत्यध्यायेषु राशिभेदग्रहभेदग्रहाणां षड्बलादि विषया चर्चिताः सन्ति।

**महादेवः।** अयं कौण्डिन्यगोत्रोत्पन्नस्य वैयाकरणमूर्धन्यस्य बोपदेवस्य पुत्र आसीत्। तस्य समयो वैक्रमाब्दः १४४२ =ख्रिस्ताब्दः १३६४=शकाब्दः १२८६ निश्चितोऽस्ति। महादेवः गोदातीरवासी त्र्यम्बकनृपतेः आश्रितः पण्डितः आसीत्। अनेन कामधेनुरीति नाम ज्यौतिर्विषयको ग्रन्थो रचितस्तत्र पञ्चत्रिंशच्छ्लोकाः कतिचित् सराण्यश्च प्राप्यन्ते।

**नार्मदः (नर्मदादेवः)।** नार्मदः अस्याऽपरनाम नर्मदादेव[51] इत्यपि प्राप्यते। अस्यैव पुत्रः पद्मनाभः पौत्रश्च दामोदरो यस्य भटतुल्य नामको ग्रन्थः प्रसिद्धोऽस्ति। नार्मदस्य समयो वैक्रमाब्दः १४३५ =ख्रिस्ताब्दः १३७८=शकाब्दः १३०० आसीत्। अनेन सूर्यसिद्धान्तस्य टीका लिखितेति ज्ञायते।

**पद्मनाभः।** अयं नार्मदस्य (वैक्रमाब्दः १४३५) पुत्रः। अस्य च पुत्रो दामोदराभिधः। अस्य समयो वैक्रमाब्दः १४५५ =ख्रिस्ताब्दः १३९८=शकाब्दः १३२० निश्चीयते। अनेन यन्त्ररत्नावली-नामक ग्रन्थो विरचितो यत्र ध्रुवभ्रमयन्त्रस्य वर्णनं वर्तते। तत्र एकत्रिंशत् श्लोकेषु मुख्यतया सायनलग्नपद्धति कालज्ञानं च निर्णीति[52]।

**दामोदरः।** अयं पद्मनाभस्य (वैक्रमाब्दः १४५५) पुत्रः नार्मदस्य (वैक्रमाब्दः १४३५) च पौत्र आसीत्। अतोऽस्य वैक्रमाब्दः १४७४ =ख्रिस्ताब्दः १४१७=शकाब्दः १३३९ आसीत्। अनेन भटतुल्यनामकग्रन्थः विरचितः। अस्मिन् ग्रन्थे ४०० पद्येषु मध्यमाधिकारः, स्पष्टाधिकारः, भौमादिपञ्चतारकाधिकारः चन्द्रग्रहणमित्यादि विषयाः विद्यन्ते।

---

[51] श्रीनर्मदादेवसुतस्य मत्पितुः
श्रीपद्मनाभस्य समस्य भावतः।
यस्मात् सुसम्पन्नमनुग्रहाद्गुरो-
भूयादिहैतत् पठनात् पदं श्रियः।। १६।। (भटतुल्यग्रन्थस्य उपसंहारः)

[52] विशेषस्तु श्रीशंकरबालकृष्णदीक्षित विरचितो भारतीय ज्योतिषशास्त्रेतिहासे (पृ. ४५७) दृष्टव्यम्।

## प्रथमा दृष्टिः।

**गङ्गाधरः।** जामदग्न्यगोत्रीयस्य चन्द्रभट्टस्य पुत्रो भट्टाचार्यस्य पौत्रो विठ्ठलस्य च प्रपौत्रः, तस्य श्रीशैलस्य पश्चिमे कृष्णवेणी भीरथ्योः अन्तरालस्थिते सगरनामक नगरस्य निवासमासीत्। अस्य समयो वैक्रमाब्दः १४९१ =ख्रिस्ताब्दः १४३४=शकाब्दः १३५६ इति निश्चीयते। अनेन सूर्यसिद्धान्तानुसारी चन्द्रमानाख्यो ग्रन्थो रचिताः। तत्र २०० पद्यानि सन्ति। अस्य वंशजेन चन्द्रलपुत्रेण विश्वनाथेन चन्द्रमानाख्यग्रन्थस्योपरि सुबोध पद्यानि लिखितानीति ज्ञायते।

**मकरन्दः।** अस्य रचनाकालो वैक्रमाब्दः १५३५ =ख्रिस्ताब्दः १४७८=शकाब्दः १४०० मन्यते। अस्य ग्रन्थस्य टीकाद्वयं प्राप्यते। दिवाकरेण वैक्रमाब्दे १७७५ =ख्रिस्ताब्दे १६१८=शकाब्दे १५४० मकरन्दविवरणाख्याटीका लिखिता। गोकुलदैवज्ञेन वैक्रमाब्दे १८२३ =ख्रिस्ताब्दे १७६६=शकाब्दे १६८८ च मकरग्रन्थस्य सारणिनां उत्पत्तयो रचिताः।

**केशवोद्वितीयः।** अयं कौशीयगोत्रीयोऽस्यपिता कमलकरो गुरुवैजनाथश्चेति। अस्य समयो वैक्रमाब्दः १५५३ =ख्रिस्ताब्दः १४९६=शकाब्दः १४१८ ज्ञायते। अयं कोकणान्तर्गत (नांदगावस्य सम्प्रति नंदिगावस्य) निवासी कथ्यते। अनेन ग्रहकौतुके जातकपद्धतिः ताजिकपद्धत्यपरनामकेशवपद्धतिः मुहूर्ततत्त्वं चेति ग्रन्था रचिता।

**गणेशदैवज्ञः।** अयं कौशीकगोत्रीयस्य केशवद्वितीयस्य लक्ष्मीरिति मातुश्चपुत्रः। अयं अपि नन्दिग्रामनिवासी। अस्य समयो वैक्रमाब्दः १५५५ =ख्रिस्ताब्दः १४९८=शकाब्दः १४२० इति प्राप्यते। अनेन ग्रहलाघवं, लघुतिथिः, चिन्तामणिः, बृहत्तितिथिचिन्तामणिः, श्राद्धनिर्णयः, तर्जनीयन्त्रं, कृष्णाष्टमीनिर्णयः, होलिकानिर्णयश्चेति ग्रन्थाः सिद्धान्तशिरोमणिटीका, लीलावतीटीक। विवाह-वृन्दावनटीका, मुहूर्ततत्त्वटीका छन्दर्णटीकाश्चेति विरचिताः।

अस्य ग्रन्थेषु विषयाणां वैविध्यं दृश्यते तद्यथा मध्यमाधिकारः, स्पष्टाधिकारः, पञ्चताराधिकारः त्रिप्रश्नाधिकारः, चन्द्रग्रहणं, सूर्यग्रहणं, मासग्रहणं, उदयास्तश्चेत्यादि प्राप्यन्ते। अद्यावधि नैकप्रान्तेषु गणेशदैवज्ञस्य भारतस्य करणसम्बन्धिसिद्धान्ताः स्वीकृताः सन्ति।

**लक्ष्मीदासः।** उपमन्युगोत्रोत्पन्नोऽयं केशवदासस्य पौत्रो वाचस्पतिमिश्रस्य पुत्र इति प्राप्यते। अस्य समयो वैक्रमाब्दः १५५५ =ख्रिस्ताब्दः १४९८=शकाब्दः १४२० ज्ञायते। अनेन भास्कराचार्यविरचित

## प्रथमा दृष्टिः।

सिद्धान्तशिरोमणिग्रन्थस्य गणिताध्यायगोलाध्यायोपरि गणिततत्त्वचिन्तामणिरिति नाम्निटीका यत्र ८५०० ग्रन्थसंख्या वर्तन्ते।

**कृपारामः।** अस्य समयो वैक्रमाब्दात् १५५५ =ख्रिस्ताब्दात् १४९८=शकाब्दात् १४२० (अर्वाचीनो) परवर्तिनी निश्चीयते। अनेन वास्तुचन्द्रिकेत्याख्यो ग्रन्थो रचितः। अनेन सर्वार्थचिन्तामणिरिति पञ्चपक्षी इति मुहूर्ततत्वमिति ग्रन्थानां टीका: रचिता:।

**रामचन्द्रः।** अस्य समयो वैक्रमाब्दात् १६१७ =ख्रिस्ताब्दात् १५६०=शकाब्दात् १४८२ पूर्वीय इति ज्ञायते। यतोऽस्य नामोल्लेखोऽनन्तदुर्गेण करणकुतूहलस्य टीकायां प्राप्यते। अनेन कल्पद्रुमकरणग्रन्थो रचितः।

**ज्ञानराजः।** भारद्वाजगोत्रीयोऽयं नृसिंहस्य पौत्रो नागनाथस्य च पुत्रः। अयं गोदावर्या उत्तरतीरस्थ पार्थपुरमित्याख्य ग्रामनिवासी। अस्य समयो वैक्रमाब्दः १५६० =ख्रिस्ताब्दः १५०३=शकाब्दः १४२५ प्राप्यते।

अनेन सिद्धान्तसुन्दर इत्याख्यग्रन्थो विरचिता। तत्र गणिताध्यायः, मध्यमाधिकारः, स्पष्टाधिकारः, त्रिप्रश्नाधिकार इत्यादिविषया एकादशेष्वधिकारेषु वर्णिताः सन्ति।

**सूर्यदासः।** सूर्येत्यपरनामाऽयं भारद्वाजगोत्रोत्पन्नो नृसिंहस्य प्रपौत्रो नागनाथस्य पौत्रो ज्ञानराजस्य पुत्र इति प्रथितः। अस्य समयो वैक्रमाब्दः १५६५ =ख्रिस्ताब्दः १५०८=शकाब्दः १४३० प्राप्यते।

अनेन सूर्यप्रकाशः, सिद्धान्तसारसमुच्चयः, श्रीपतिगणितं, बीजगणितं, ताजिकालङ्कारः, काव्यद्वयं (काव्याष्टकं वा)चेति ग्रन्था: रचिता: सन्ति। बोधसुधाकर इति चाध्यात्मिकविषयको ग्रन्थोऽपि रचित इति ज्ञायते। अनेन भास्कराचार्यस्य लीलावती सिद्धान्तशिरोमणिग्रन्थद्वयोपरि टीका विरचिता।

**अनन्तः।** अयं श्रीकान्तस्य पुत्रः। अस्य समयो वैक्रमाब्दः १५८२ =ख्रिस्ताब्दः १५२५=शकाब्दः १४४७ प्राप्यते। अनेन अनन्तसुधारसनामक पञ्चाङ्गसारणिगणितग्रन्थो रचितः। अस्योपरि ढुण्ढीराजस्य सुधारसकरणचषकाख्याटीका प्राप्यते।

## प्रथमा दृष्टिः।

**ढुण्ढीराजः।** भारद्वाजगोत्रोत्पन्नोऽयं नीलकण्ठस्य प्रपौत्रोनागनाथस्य पौत्र नृसिंहस्यपुत्र इति प्राप्यते। अयं गोदावर्या उत्तरतीरस्थ पार्थपुरमित्याख्यग्रामनिवासी। अस्य समयो वैक्रमाब्दः १५८२ =ख्रिस्ताब्दः १५२५=शकाब्दः १४४७ प्राप्यते।

अनेन जातकाभरणं, ग्रहलाघवोदाहरणं, ग्रहफलोत्पत्तिः, पञ्चाङ्गफलं, कुण्डकल्पलता चेति ग्रन्था विरचिताः। अनन्तकृत (वैक्रमाब्दः १४४७) सुधाकरकरणग्रन्थस्य सुधारसचषकटीकाऽपि लिखितेति ज्ञायते।

**नृसिंहः।** कौशीकगोत्रोत्पन्नस्याऽस्य केशवस्य पौत्रो रामस्यपुत्रः गणेशदैवज्ञस्य च भ्रातुव्य आसीत्। अस्य जन्मसमयो वैक्रमाब्दः १६०५ =ख्रिस्ताब्दः १५४८=शकाब्दः १४७० प्राप्यते। अनेन मध्यमग्रहसिद्धिरितिनामको ग्रन्थो विरचितः।

**अनन्तः।** गार्ग्यगोत्रोत्पन्नोऽयं चिन्तामणेः पुत्रः। अस्य समयो वैक्रमाब्दः १६१५ =ख्रिस्ताब्दः १५५८=शकाब्दः १४८० प्राप्यते। बोपदेवात्मज-महादेवेन (वैक्रमाब्दः १४४२) विरचितस्य ग्रन्थस्योपरि टिका लिखिता।

**रघुनाथः।** अस्य समयो वैक्रमाब्दः १६२० =ख्रिस्ताब्दः १५६२=शकाब्दः १४८४ प्राप्यते। अनेन ब्रह्मसिद्धान्तानुसारं सुबोधमञ्जरीत्याख्यो ग्रन्थो विरचितो यत्र ग्रहसाधनमहर्गणेन कथितम्।

**रघुनाथः।** सोमभटात्मजस्य रघुनाथस्याऽस्य समयो वैक्रमाब्दः १६२३ =ख्रिस्ताब्दः १५६५=शकाब्दः १४८७ इति ज्ञायते। अनेन मणिप्रदीपनामको ग्रन्थो रचितः।

**दिनकरः।** कौशीकगोत्रोत्पन्नोऽयं मोढब्राह्मणज्ञातियः ऊन्दाक्षपुत्रः गुर्जरराज्ये साभ्रमतीतटसमीप-वर्तिनि बारेजाख्येग्रामे वसति स्म। अस्य समयो वैक्रमाब्दः १६३५ =ख्रिस्ताब्दः १५७८=शकाब्दः १५०० ज्ञायते।

अनेन विरचिते लघुखेटकसिद्धिरितिचन्द्रार्कीति ग्रन्थद्वये स्वपरिचयः प्रदत्तो वर्तते। यत्र गुर्जरराज्यान्तर्गतस्य खेटकस्य (आधुनिक खेडा) क्षेपक इति परिगणितः।

## प्रथमा दृष्टिः।

**नृसिंहः।** तैत्तिरीयशाखाध्यायी भारद्वाजगोत्रोत्पन्नोऽयं महाराष्ट्रीयो विदर्भसमीपस्थ गोलेतिग्रामनिवासी आसीत्। अयं भट्टाचार्यस्य प्रपौत्रो दिवाकरस्य पौत्रो विष्णाज्ज्येष्ठभ्रातुः कृष्णस्य च पुत्रः आसीत्। अस्य समयो वैक्रमाब्दः १६४३ =ख्रिस्ताब्दः १५८६=शकाब्दः १५०८ इति निश्चीयते। अस्य सूर्यसिद्धान्तस्य सौरभाष्यटीका सिद्धान्तशिरोमणेः वासनावार्तिकेति टीके प्राप्येते।

**शिवः।** तैत्तिरीयशाखाध्यायी भारद्वाजगोत्रोत्पन्नोऽयं महाराष्ट्रीयो विदर्भसमीपस्थ गोलेति ग्रामनिवासी आसीत्। अयं भट्टाचार्यस्य प्रपौत्रो दिवाकरस्य पौत्रः कृष्णस्य च कनिष्ठः पुत्रः। अस्य जन्मसमयो वैक्रमाब्दः १६४५ =ख्रिस्ताब्दः १५८४=शकाब्दः १५१० प्राप्यते। अनेन मुहूर्तचूडामणिरीत्याख्यो ग्रन्थो रचितः।

**श्रीनाथः।** अयं रामस्य पुत्रः। अस्य समयो वैक्रमाब्दः १६४६ =ख्रिस्ताब्दः १५८९=शकाब्दः १५१२ ज्ञायंते। अनेनाऽध्यायद्वयात्मके ग्रहचिन्तामणिरीत्याख्यः करणग्रन्थो विरचितः।

**रामभट्टः।** गार्ग्यगोत्रोत्पन्नास्याऽस्य पितामह चिन्तामणिः पिताऽनन्तो जननी च पद्मेति प्राप्यते। अस्य समयो वैक्रमाब्दः १६४७ =ख्रिस्ताब्दः १५९०=शकाब्दः १५१२ इति निश्चीयते।

अनेन रामविनोद इति ग्रन्थो रचितो यत्र एकादशाऽधिकाराः २८० पद्यानि सन्ति। अस्य सहायको ग्रन्थोऽपि विरचितो यस्याऽऽधारं गृहीत्वा पञ्चाङ्गरचना क्रियते। रामदैवज्ञ(वैक्रमाब्दः) मुहूर्तचिन्तामणिग्रन्थोपरि रामभट्टस्य प्रतिमाक्षरीति टीका प्राप्यते।

**कृष्णः।** अयं देवरातगोत्रोत्पन्नो यजुर्वेदीयः त्रिमल्लस्य पौत्रो वल्लालस्य गोज्याश्च पुत्र इति ज्ञायते। अयं विदर्भदेशान्तर्गते पयोष्णीतटसमीपस्थे दधिग्रामेन्यवसत्। अस्य समयः वैक्रमाब्दः १६५५ =ख्रिस्ताब्दः १५९८=शकाब्दः १५२० ज्ञायते।

अनेन भास्कराचार्यस्य (वैक्रमाब्दः११७७) बीजगणितमित्यस्योपरि बीजनवाङ्कुरमित्याख्याटीका विरचिता श्रीपति (वैक्रमाब्दः१०३५) जातकपद्धतिरीत्याख्यग्रन्थस्योपरि सोदाहरणटीकाऽपि विरचिता।

**मल्लारिः।** तैत्तिरीयशाखाध्यायी भारद्वाजगोत्रोत्पन्नोऽयं महाराष्ट्रीयो विदर्भसमीस्थ गोलेतिग्रामनिवासी आसीत्। अयं विष्णोर्लघुभ्राता। अस्य समयः वैक्रमाब्दः १६५९ =ख्रिस्ताब्दः १६०२=शकाब्दः १५२४ ज्ञायते। अनेन गणेशदैवज्ञस्य ग्रहलाघवोपरि सोदाहरणीटीका विरचिता।

## प्रथमा दृष्टिः।

**रङ्गनाथः।** अयं तैत्तिरीयशाखाध्यायी भारद्वाजगोत्रीयमहाराष्ट्रीयो विदर्भसमीस्थ गोलेतिग्रामनिवासी। अयं दिवाकरस्य प्रपौत्रः कृष्णस्य पौत्रो नृसिंहस्य च पुत्रः। अस्य जन्मकालो वैक्रमाब्दः १६५९ =ख्रिस्ताब्दः १६०२=शकाब्दः १५२४ इति ज्ञायते।

अनेन विरचिते सिद्धान्तचूडामणिरितिग्रन्थे द्वादशाधिकाराः ४०० पद्यानि च सन्ति। भास्कराचार्यकृत सिद्धान्तशिरोमणेरुपरि मितभाषिणीटीका रचिता।

**रङ्गनाथः।** देवरातगोत्रोत्पन्नो यजुर्वेदीयः श्रीत्रिमल्लस्य पौत्रो वल्लालस्य गोज्याश्च पुत्रः कृष्णस्य च लघुभ्राता। अस्य समयः वैक्रमाब्दः १६६० =ख्रिस्ताब्दः १६०३=शकाब्दः १५२५ इति प्राप्यते। अनेन सूर्यसिद्धान्तस्य गूढार्थप्रकाशेति टीका रचिता।

**मुनीश्वरः।** देवरातगोत्रोत्पन्नोऽयं त्रिमल्लस्य प्रपौत्रो वल्लालस्य पौत्रो रङ्गनाथस्य पुत्रः कृष्णस्य च भ्रातृव्यः। स्वपितृव्यस्य गोविन्दस्य पुत्रो नारायणोऽस्य गुरुरासीत्। अस्य जन्मकालः वैक्रमाब्दः १६६० =ख्रिस्ताब्दः १६०३=शकाब्दः १५२५ इति प्राप्यते।

अनेन सिद्धान्तसार्वभौम इति स्वतन्त्रो ग्रन्थो विरचितः। भास्कराचार्यकृत लीलावती ग्रन्थस्योपरि निसृष्टार्थदूती लीलावतीविवृती च रचिते। भास्कराचार्यकृत सिद्धान्तशिरोमणेः गणिताध्यायस्य गोलाध्यायस्य चोपरि मरीचीरित्याख्या टीका रचिता।

**दिवाकरः।** तैत्तिरीयशाखाध्यायी भारद्वाजगोत्रोत्पन्नोऽयं महाराष्ट्रीयो विदर्भसमीस्थ गोलेतिग्राम-निवासी। अयं दिवाकरस्य प्रपौत्रः कृष्णस्यपौत्रो नृसिंहस्य च पुत्रः। अस्य जन्मकालः वैक्रमाब्दः १६६३ =ख्रिस्ताब्दः १६०६=शकाब्दः १५२८ इति निश्चीयते।

अनेन जातकमार्गेति ग्रन्थो विरचितः। केशवकृतजातकपद्धतिग्रन्थस्योपरि प्रोढमनोरमेति स्वकीयजातकपद्धतेरुपरि च गणिततत्वचिन्तामणिरिति टीके रचिते।

**विष्णुः।** तैत्तिरीयशाखाध्यायी भारद्वाजगोत्रोत्पन्नोऽयं महाराष्ट्रीयो विदर्भसमीपस्थ गोलेतिग्रामनिवासी आसीत्।

MEHTA LIBRARY

अयं रामस्य प्रपौत्रो भट्टाचार्यस्य पौत्रो दिवाकरस्य च पुत्र इति प्राप्यते। अस्य समयो वैक्रमाब्दः १६६५ =ख्रिस्ताब्दः १६०८=शकाब्दः १५३० इति निश्चीयते। अनेन सौरपक्षीयं कृष्ण[illegible] गणेशदेवज्ञस्य बृहत् चिन्तामणेश्चटीका च विरचिता।

**कमलाकरः।** तैत्तिरीयशाखाध्यायी भारद्वाजगोत्रोत्पन्नोऽयं दिवाकरस्य प्रपौत्रः कृष्णस्य पौत्रो नृसिंहस्य द्वितीयः पुत्रो दिवाकरस्य च भ्राता। अयं विदर्भसमीपस्थ गोलेतिग्रामनिवासी। अस्य जन्मसमयः प्रायो वैक्रमाब्दः १६६५ =ख्रिस्ताब्दः १६०८=शकाब्दः १५३० इति ज्ञायते।

अनेन 'सिद्धान्ततत्त्वविवेक' इत्याख्यो ग्रन्थः काश्यां विरचित इति प्राप्यते। तत्र ग्रन्थे १३ अधिकारेषु सिद्धान्तविषयाः वर्णिताः।

**नागेशः।** अयं तुकेश्वरस्य पौत्रः शिवस्य च पुत्रः। तस्य समयो वैक्रमाब्दः १६७६ =ख्रिस्ताब्दः १६१९= शकाब्दः १५४१ इति निश्चीयते। अनेन ३८ पद्यबद्धो 'ग्रहप्रबोध' इत्याख्यः करणग्रन्थो विरचितः।

**विश्वनाथः।** तैत्तीरीयशाखाध्यायी भारद्वाजगोत्रोत्पन्नोऽयं महाराष्ट्रीयो विदर्भसमीपस्थ गोलेतिग्राम निवासी आसीत्। अयं रामस्य प्रपौत्रो भट्टाचार्यस्यपौत्रो दिवाकरस्य च पुत्रः। अस्य समयो वैक्रमाब्दः १६८६ =ख्रिस्ताब्दः १६२९=शकाब्दः १५५१ निश्चीयते। अनेन सूर्यसिद्धान्तस्य सोदाहरणीटीका ग्रहलाघवः ताजिकनिकण्ठीतयोरुपरि टीकाद्वयमपि विरचितम्।

**नित्यानन्दः।** मुद्गलगोत्रोत्पन्नो गौडब्राह्मणोऽयं लक्ष्मणस्य प्रपौत्रो नारायणस्य पौत्रो देवदत्तस्य च पुत्रः।

अयं कुरुक्षेत्रसमीपस्थेन्द्रपुरी निवासी। अस्य समयः वैक्रमाब्दः १६९६ =ख्रिस्ताब्दः १६३९=शकाब्दः १५६१ इति निश्चीयते। अनेन विरचिते सर्वसिद्धान्तराज इति ग्रन्थे गणिताध्यायस्य नवाधिकाराः गोलाध्यायस्य च त्रयोऽधिकाराः सन्ति यत्र सिद्धान्तविषयावर्णिताः।

## प्रथमा दृष्टिः।

**कृष्णः।** काश्यपगोत्रोत्पन्नोऽयं देशस्थमहाराष्ट्रीयब्राह्मणो महादेवस्य पुत्रः। अयं सह्याद्रिनिकटस्थ मालवाप्रान्तनिवासी। अस्य समयः वैक्रमाब्दः १७१० =ख्रिस्ताब्दः १६५३=शकाब्दः १५७५ निश्चीयते। अनेन कारणकौस्तुभाख्योग्रन्थो रचितः।

**रत्नकण्ठः।** अयं शङ्करस्य पुत्रः काश्मीरप्रान्तनिवासी। अस्य समयः वैक्रमाब्दः १७१५ =ख्रिस्ताब्दः १६५८=शकाब्दः १५८० इति प्राप्यते। अनेन पञ्चाङ्गकौस्तुभाख्योग्रन्थो रचितो यत्र पञ्चाङ्गनिर्माणविषयाः सन्ति।

**जयसिंहः।** राजाजयसिंह आमेरस्य(राजस्थान) नृपतिरयम्। अयं गणितज्ञो ज्योतिषज्ञो वेधकुशलश्चासीत्। अस्य समयः वैक्रमाब्दः १७५० =ख्रिस्ताब्दः १६९३=शकाब्दः १६१५ प्राप्यते।

अनेनैव जयपुरं स्थापितम्। ततश्च जयपुरे, दिल्हीनगरे, उज्जैन्यां, काश्यां, मथुरायाञ्च वेधशालानां निर्माणं कारितम्। अनेन जयप्रकाशो यन्त्रसम्राटभित्तियन्त्रं वृत्तषष्ठांशश्चैतन्नामकानि विशिष्टयन्त्राणि कारितानि। अस्यैवनृपतेरादेशं गृहीत्वा जगन्नाथाख्यपण्डितः सिद्धान्तसम्राट् युक्लिडस्य च भूमेतेः संस्कृतानुवादं कृतवान्।

**जटाधरः।** गर्गगोत्रोत्पन्नोऽयं उद्धवस्य प्रपौत्रो दुर्गामिश्रस्य पौत्रो वनमालीत्यस्य पुत्रः। अयं सरहिन्द निवासी। अस्य समयः वैक्रमाब्दः १७६१ =ख्रिस्ताब्दः १७०४=शकाब्दः १६२६ इति निश्चीयते। अनेन फतेहशाहप्रकाशाख्यो ग्रन्थो रचितः।

**विद्दणः।** कौडिन्यगोत्रोत्पन्नोऽयं मल्लस्य पुत्रः। अयं धारवाडप्रान्तस्य बङ्कापुर निवासी। अस्य समयः वैक्रमाब्दः १७६९ =ख्रिस्ताब्दः १७१२=शकाब्दः १६३४ प्राप्यते। अनेन वार्षिकतन्त्रनामको ग्रन्थो रचितो यत्र कलियुगारम्भगणितस्य चर्चाकृता वर्तते।

**दादाभट्टः।** अयं माधवस्य पुत्रः चितपावनमहाराष्ट्रीयब्राह्मण आसीत्। अस्य समयः वैक्रमाब्दः १७७६ =ख्रिस्ताब्दः १७१९=शकाब्दः १६४१ प्राप्यते। अनेन सूर्यसिद्धान्तस्य कीरणावलीटीका विरचिता।

## प्रथमा दृष्टिः।

**चिन्तामणिदीक्षितः।** वत्सगोत्रोत्पन्नोऽयं विनायकस्य पुत्रः। अयं चिपलूणग्रामनिवासी। अस्य जन्मकालो वैक्रमाब्दः १७९३ =ख्रिस्ताब्दः १७३६=शकाब्दः १६५८ प्राप्यते। अनेन गोलानन्दनामको ग्रन्थो रचितो यत्र वेधयन्त्रविषया वर्णिताः। सूर्यसिद्धान्तस्य सारण्योऽपिनिर्मिताः।
**शङ्करः।** वसिष्ठगोत्रोत्पन्नोऽयं रामस्य प्रपौत्रो धनेश्वरस्य पौत्रो शुक्रस्य च पुत्रः। अस्य समयः वैक्रमाब्दः १८२३ =ख्रिस्ताब्दः १७६६=शकाब्दः १६८८ प्राप्यते। अनेन वैष्णवकरणग्रन्थो रचितः।

**मणिरामः।** यजुर्वेदीयो भारद्वाजगोत्रोत्पन्नोऽयं लीलाधरस्य प्रपौत्रो लालमणेः पौत्रो देवीदासस्य वत्सराजस्य पुत्रः कश्यपगोत्रीयस्य वत्सराजस्य शिष्योऽयम्। अस्य समयः वैक्रमाब्दः १८३१ =ख्रिस्ताब्दः १७७४=शकाब्दः १६९६ प्राप्यते। अनेन ग्रहगणितचिन्तामणीरित्याख्यो ग्रन्थो रचितो यत्र द्वादशाधिकारेषु १२० पद्यानि सन्ति। तत्र मध्यमग्रहसाधनं, स्पष्टग्रहसाधनं, लग्नसाधनेत्यादि विषयाः वर्णिताः।

**मथुरानाथः।** अयं सदानन्दस्य पुत्रो मालवाप्रान्तीयः। अस्य समयो वैक्रमाब्दः १८३९ =ख्रिस्ताब्दः १७८२=शकाब्दः १७०४ प्राप्यते। अनेन ज्यौतिषसिद्धान्तसाराख्यो ग्रन्थो रचितो यत्राऽष्टाध्यायाः सन्ति। यन्त्रराजघटनाख्यो ग्रन्थोऽपि रचितः।

**भुला।** गार्ग्यगोत्रोत्पन्नोऽयं नारायणस्य पुत्रः। अयं नर्मदासङ्गमस्थानात् पूर्वदेशे दधीचेत्याख्यग्राम-निवासी। अस्य समयः वैक्रमाब्दः १९६५ =ख्रिस्ताब्दः १८०८=शकाब्दः १७३० इति निश्चीयते। अनेन ब्रह्मसिद्धान्तसार इत्याख्यो ग्रन्थो रचितो यत्र द्वादशाधिकारेषु १२४ पद्यानि सन्ति। तत्र अहर्गणानयन्ति ग्रहसाधनं इत्यादयः विषया वर्णिताः।

**राघवः।** खाण्डेकरो उपाह्वोऽयं आपापन्तस्य पुत्रः खानदेशप्रान्तस्य पारोले ग्रामनिवासी। अस्य समयो वैक्रमाब्दः १८६७ =ख्रिस्ताब्दः १८१०=शकाब्दः १७३२ प्राप्यते। अनेन खेटकृतिनामकोग्रन्थो रचितो यत्र ग्रहलाघवसमानविषयावर्णिताः सन्ति। अनेन 'पञ्चाङ्गार्क' इत्याख्यो ग्रन्थः स्वोपज्ञटीकासह रचितः। जातकविषयको ग्रन्थोऽपि रचितः।

## प्रथमा दृष्टिः।

**दिनकरः।** शाण्डिल्यगोत्रोत्पन्नोऽयं अनन्तस्य पुत्रः पूणे निवासी। अस्य समयो वैक्रमाब्दः १८६९ =ख्रिस्ताब्दः १८१२=शकाब्दः १७३४ निश्चीयते। अनेन चक्रधरकृतयन्त्रग्रन्थस्योपरि यन्त्रचिन्तामणे-रित्याख्याटीका विरचिता यत्र सोदाहरणात् ग्रहविज्ञानमासप्रवेशाद्या विविधा सारण्यः प्रदत्ताः।

**शिवः।** विश्वामित्रगोत्रोत्पन्नोऽयं महादेवस्य पुत्रो लक्ष्मेश्वर निवासी। अस्य समयो वैक्रमाब्दः १८७२ =ख्रिस्ताब्दः १८१५=शकाब्दः १७३७ प्राप्यते। अनेन तिथिपारिजाताख्यो ग्रन्थो रचितो यत्र तिथिसाधनार्थं सारण्यः प्रदत्ता।

**यज्ञेश्वरः।** शाण्डिल्यगोत्रोत्पन्नोऽयं रामस्य पौत्रः सदाशिवस्य च पुत्रः। अयं बाबाजोशीरोडै इति नाम्नाऽपि प्रसिद्धोऽस्ति। अस्य समयो[५३] वैक्रमाब्दः १८९५=ख्रिस्ताब्दः १८३८=शकाब्दः १७६० प्राप्यते। अनेन यन्त्रराजग्रन्थस्योपरि यन्त्रराजवासनेत्याख्या चिन्तामणिदीक्षितकृतं गोलानन्दग्रन्थस्योपरि अनुभाविकेटीकाद्वयं विरचितम्।

**नृसिंहः।** ऋग्वेदीचितपावनज्ञातीयोब्राह्मणः सीतारामसत्यभामयोः पुत्रः। अस्य जन्मकालो वैक्रमाब्दः १८७८=ख्रिस्ताब्दः १८२१=शकाब्दः १७४३ प्राप्यते। अयं गोदातस्थाऽहमदनगरसमीपे टोकग्राम निवासी। अनेन रेखागणितं त्रिकोणमिति, तत्वविवेकपरीक्षा चलनकलनसिद्धान्तबोधकइत्यादयो बह्वोग्रन्थाः रचिताः।

अनेन सूर्यसिद्धान्तस्याऽङ्लभाषायामनुवादोऽपि कृतः। अस्य प्रायः सर्वेऽपि ग्रन्थाः प्रकाशिताः सन्ति।

**विनायकः केरोलक्ष्मणो वा।** कश्यपगोत्रोत्पन्नोऽयं तपावनो महाराष्ट्रीयब्राह्मणः। अस्य जन्मकालो वैक्रमाब्दः १८८१ =ख्रिस्ताब्दः १८२४=शकाब्दः १७४६ प्राप्यते। अयं मुम्बापुर्यादक्षिणे समुद्रतटवर्तिनो नागांवस्यनिवासी। अनेन ग्रहसाधनकोष्ठकमित्याख्योग्रन्थो रचितो यत्र सूर्यसिद्धान्तानुसारेण वर्षमानं, ग्रहगणितं चेत्यादिविषया निरूपिताः सन्ति।

---

[५३] उपरिनिर्दिष्टः समयो यज्ञेश्वरस्य संस्कृतपाठशालातो निवृत्तिसमय इति विचार्य तस्य नृसिंहात् (बापुदेवशास्त्रीतः) पूर्व एव भवेत्। यज्ञश्वरस्य जन्मकालो वैक्रमाब्दः १८३७=ख्रिस्ताब्दः १९८०=शकाब्दः १७०२ भवेदित्यलम्।

## प्रथमा दृष्टिः।

**विसाजीरघुनाथलेले।** कश्यपगोत्रोत्पन्नोऽयं कृष्णयजुर्वेदस्य हिरण्यकेशिशाखाध्यायीमहाराष्ट्रीयो चितपावनो ब्राह्मणः। अस्य जन्मकालो वैक्रमाब्दः १८८४ =ख्रिस्ताब्दः १८२७=शकाब्दः १७४९ प्राप्यते। अयं महाराष्ट्रप्रान्तस्य नासिकनगरनिवासी। अनेन सायनमतानुसारेण पञ्चाङ्गनिर्माणं कृतमिति प्राप्यते।

**चिन्तामणिरघुनाथः।** अस्य जन्मकालो वैक्रमाब्दः १८८५=ख्रिस्ताब्दः १८२८=शकाब्दः १७५० प्राप्यते। अयं द्रविडदेशीयो ज्योतिर्विदाम्कुले जातो ब्राह्मणः।

अनेन ज्यौतिषचिन्तामणिरिति नामको ग्रन्थो विरचितो यत्र पृथ्वी आकाशादिग्रहाणां चाकारविस्तारगत्यादि विषयावर्णिताः। अनेन दृग्गणित पञ्चाङ्गनिर्माणमपिकृतम्।

रूपविकारीणस्ताराद्वयस्याऽनेन नूतनमन्वेषणं कृतं तेन भारतीयज्योतिर्विदां प्रथमोऽयमिति प्रसिद्धिर्यावच्चन्द्रदिवाकरौ स्थापयति।

**कृष्णशास्त्रीगोडबोले।** कौशिकगोत्रोत्पन्नोऽयं कृष्णयजुर्वेदस्य हिरण्यकेशि शाखाध्यायी चितपावनो महाराष्ट्रीय ब्राह्मणः। अस्य गुरुर्नामशङ्करजोशी।

अस्य जन्मकालो वेक्रमाब्दः १८८८=ख्रिस्ताब्दः १८३१=शकाब्दः १७५३ प्राप्यते।

अनेन ग्रहलाघवं हडन्नामकस्य लेखकस्य बीजगणीतम्, युक्लिडस्य च रेखागणितमित्येषां महाराष्ट्रीय भाषायामनुवादाः कृता।

**वेङ्कटेशबापूजीकेतकरः।** गार्ग्यगोत्रोत्पन्नोऽयं ऋग्वेदीयोमहाराष्ट्रीयो चितपावनो ब्राह्मणः। अस्य जन्मकालो वैक्रमाब्दः १९१०=ख्रिस्ताब्दः १८५३=शकाब्दः १७७५ प्राप्यते।

अनेन ज्यौतिर्गणितमित्याख्यो ग्रन्थो रचितो यत्र पञ्चाङ्गं, ग्रहस्थापनगणितं, ग्रहाणामुदयास्तो लग्नानयनमित्यादि विषया निरूपिताः सन्ति।

**बालगङ्गाधरतिलकः।** अस्य जन्मकालो वैक्रमाब्दः १९१३=ख्रिस्ताब्दः १८५६=शकाब्दः १७७८ प्राप्यते।

अयं गणितज्यौतिषस्याऽध्यापक आसीत् अनेनैव मृगशीर्षनक्षत्रे वसन्तसम्पातस्य गणनं कृत्वा ऋग्वेदस्य कतिपयसूक्तानां दर्शनकालः ३९२२ वैक्रमाब्दात् (३९४२ ख्रिस्ताब्दात् = ४००० शकाब्दात्) पूर्वे निर्धारित इति तस्य महत्तमं प्रशस्यं प्रदानमित्यलम्।

**नीलाम्बरः।** मैथिलब्राह्मणोऽयं शम्भुनाथस्यपुत्रो जीवनाथस्य च लघुभ्राता। अयं चालवरनरेशस्य शिवस्य प्रधान ज्यौतिर्विदाऽसीत्। अस्य जन्मकालो वैक्रमाब्दः १९४०=ख्रिस्ताब्दः १८८३=शकाब्दः १८०५ प्राप्यते।

**अर्वाचीन ज्यौतिर्विदानां परिचयः।**

**अमृतलालशास्त्री।** कुशिकस्गोत्रोत्पन्नोऽयं शुक्लयजुर्वेदस्य माध्यादिनी शाखध्यायी श्रीगौडब्राह्मणो दुर्लभरामस्यप्रपौत्रः केशवस्य पौत्रो नारायणस्य पुत्रः। अस्य जन्मकालो वैक्रमाब्दः =१९१७ = ख्रिस्ताब्दः १८६० =शकाब्दः १९८२ अयं गुजरातराज्यस्य वडोदरा ग्रामस्य निवासी।

अनेन प्रथमं वडोदरानगरे संस्कृतपाठशालायां प्राथमिकज्ञानं गृहीत्वा विशेषाभ्यासार्थे काशीनगरे गत्वा ज्यौतिषशास्त्रस्य उपाध्यायपदवीं सयाजिरावमहाराजा द्वारा आर्थिकसाहाय्येन प्राप्तास्मः।
ख्रिस्ताब्दः १९०४ वर्षे जगद्गुरु शंकराचार्य श्री माधवतीर्थस्य प्रमुखपदे ज्यौतिषानां सभायां ज्यौतिषमार्तंड पदवीं प्राप्तास्मः।

**श्यामलालः।** अयं गौडकुलोत्पन्नो गोविन्दरामस्य प्रपौत्रो घनश्यामदासपण्डितस्य पौत्रः। बलदेवप्रसादस्य पुत्रः आसीत्। अस्य समयो वैक्रमाब्दः १८५२ = ख्रिस्ताब्दः १८९६ = शकाब्दः १८१८ प्राप्यते । अयं वंशवरेलिस्थ राजज्यौतिषासीत् अस्य गुरुः श्रीलालजीरामगुरुरासीत्। अनेन ज्योतिषश्यामसङ्गहोग्रन्थो स्वकीय श्यामसुन्दरीभाषाटीका रचिता।

**रतीनाथशास्त्री।** कुशिकस् गोत्रोत्पन्नोऽयं शुक्लयजुर्वेदस्य माध्यदिनी शाखाध्यायी श्रीगौडब्राह्मणो जगन्नाथस्य प्रपौत्रो विश्वनाथस्य पौत्रो लक्ष्मीनाथस्य पुत्र आसीत्। अयं गुजरातप्रान्तस्य वटोदरनगरस्य निवासी आसीत्। अस्य जन्मसमयो वैक्रमाब्दः १८५४ = ख्रिस्ताब्दः १८९७ = शकाब्दः १८१९ प्राप्यते। अनेन ज्यौतिषशास्त्रस्याऽभ्यासो लोककल्याणार्थं कृतः। अस्य शिष्यसमूदायो वटोदरनगरे वसति।

**आचार्यकनैयालालजोशी।** भारद्वाजगोत्रोत्पन्नोऽयं सामवेदस्य कौथुमीशाखाध्यायी केशवस्य प्रपौत्रो जगन्नाथस्य पौत्रो माधवलालस्य पुत्रः। अस्य समयो वैक्रमाब्दः १९५९ = ख्रिस्ताब्दः १९०३

= शकाब्दः १८२४ प्राप्यते। अयं गुजरातप्रान्तस्य वडोदरानगरस्य निवासी। वेदवेदान्तपुराणज्यौतिष-तन्त्रादिशास्त्रे पारङ्गत आसीत्। अनेन ज्यौतिषालङ्कार इति सम्मानीत पदवीमलभत। अयं वडोदरा-संस्कृतविद्वत्सभायां राजकीय संस्कृत पाठशालायां (=आधुनिके वडोदरा संस्कृत महाविद्यालये) जैनपाठशालासु च वैदुष्यपूर्ण प्रवचनैः चर्चा सभाभिश्च प्रवचन केसरीति प्रथितनामाऽसीत।

**जगन्नाथ पदेशास्त्री।** वत्सस् गोत्रोत्पन्नोऽयं शुक्लयजुर्वेदस्य माध्यंदिनी शाखाध्यायी महाराष्ट्रीयो ब्राह्मणः श्री त्र्यम्बकस्य प्रपौत्रो लक्ष्मणस्य पौत्रः श्रीधरस्य च पुत्र आसीत्। अस्य जन्मकालो वैक्रमाब्दः १९६९ = ख्रिस्ताब्दः १९१२ = शकाब्दः १८३४ प्राप्यते। अयं शुक्लयजुर्वेदघनपाठी वैयाकरणो धर्मशास्त्रप्रवीणः संस्कृतरचना कुशलश्चा सीत्। असौ भरतमुनिविरचितप्रश्नविद्यानामक ज्यौतिष शास्त्रेतिग्रन्थस्य टीकां कृतवान्। असौ ज्यौतिषशास्त्र - न्याय - सांख्ययोग - मीमांसादि षट्शास्त्री इति ख्यातिं लब्धवान्।

**केदारदत्त जोशी।** अयं अलमोडामंडलस्य शण्डयुऽयार (शाण्डिल्याश्रम) निवासी। गर्गगोत्रोत्पन्नोऽयं कौशल्यामातुहरिदत्त पितुश्च पुत्रः। अनेन स्वकीयानां पूर्वजानांनोमोल्लेखकृतः। गोवर्धनस्य गणशो गोकुलानन्दोहरजीवा विनायको वीरभद्र इतिपञ्चपुत्रास्तेषां पञ्चमस्य वीरभद्रस्य पुत्रः चन्द्रमणिस्तस्यपुत्रो भवानीदत्तस्तस्यपुत्रः पद्मापतिः [५४] तस्यपुत्रो वासुदेवो यस्य पुत्रो हरिदत्तेव केदारदत्तस्य पिता। अस्य समयः वैक्रमाब्दः १९७२ = ख्रिस्ताब्दः १९१५ = शकाब्दः १८३७ इति ज्ञायते। अनेन स्वकीयां बृहज्जातकोपरिलिखितभट्टोपलस्य व्याख्यायाः टीका कृता दृश्यते तत्र ज्यौतिषशास्त्रस्य संक्षिप्तेतिहास सिद्धान्तगणितमित्यादि विषयाः प्रस्तावनायां प्रदत्ता। अन्ये च विषयाः बृहज्जातकानुसारेणैव हिन्दी टीकायां प्रदत्ता।

**लक्ष्मीकान्तझा।** कश्यपगोत्रोत्पन्नोऽयं शुक्लयजुर्वेदस्य माध्यदिनीशाखाध्यायी मैथिलब्राह्मणो विष्णुदत्तस्य पौत्रो झोटोःपुत्र आसीत्। अस्य जन्मकालो वैक्रमाब्दः १९९२=ख्रिस्ताब्दः १९१५=शकाब्दः १८३७ प्राप्यते। अयं बिहारराज्यस्य मधुबनी प्रान्तस्य गजहराग्रामस्य निवासी आसीत्। अनेन वाराणस्यां वाराणसेय संस्कृत विश्वविद्यालये ज्यौतिषशास्त्रे गणितं फलितं चेत्यध्यनं कृतं। पं. लक्ष्मीकान्त झा महोदयानां परिचयस्तेषां पुत्रवैर्यः डॉ. प्रतापनारायण झा महोदयैः प्रदत्तः। डॉ. झा महोदयानामपुकामत्र स्मरामि।

[५४] अयं किकैकदा व्याघ्रेण्गृहीतो गिर्काचपुनः प्राप्तोऽथास्य व्याघ्रदेवेति नामाऽपि प्रसिद्धम्।

## प्रथमा दृष्टिः।

**डॉ. निरञ्जनशुक्लः।** गर्गस्गोत्रोत्पन्नोऽयं शुक्लयजुर्वेदस्य माध्यदिनी शाखाध्यायी श्रीगौडब्राह्मणः कृपाशङ्करस्य प्रपौत्रो नाथुभाईशुक्लस्य प्रौत्रौश्चन्द्रशङ्करस्य च पुत्रः। अस्य जन्मकालो वैक्रमाब्दः १९९५ = ख्रिस्ताब्दः १९३८ = शकाब्दः १८६० अस्ति। अयं गुजरातप्रान्तस्य वटोदरनगरस्य निवासी। अस्य विद्याभ्यासो वडोदरा संस्कृत महाविद्यालये पण्डित शिरोमणिर्लक्ष्मीकान्त झा शास्त्री महादेवप्रसाद जानी शास्त्री महादेवप्रसाद काशीनाथ भट्ट शास्त्री रतीनाथ भट्ट श्चेत्येतेषां जातः।

वाचस्पति (पी.एच.डी.) रित्युपाधिं धारयता डॉ. निरञ्जनशुक्लेन ज्यौतिषशास्त्रे धर्मशास्त्रे साहित्यशास्त्रे चाऽऽर्यस्योपाधयोपि समासादिताः। अनेन 'जैमिनिसूत्रम्-एकमध्ययनम्' इति शीर्षकमाश्रित्य वाचस्पति निबंधस्तत्कालीनानां प्रधानाचार्याणां प्रो. डॉ. प्रभाकर केशव डोंगरे महानुभावानां निपूणेमार्गदर्शने प्रसाधितः। १९७५ ख्रिस्ताब्दात् १९९८ पर्यन्तम् वडोदरा संस्कृत महाविद्यालयेऽध्यापकत्वे कार्यं कुर्वाणोऽयं १९९५ ख्रिस्ताब्दात् १९९१ पर्यन्तं तत्रैव प्रधानाचार्यपदमपि समलङ्कृतवान्। साम्प्रतं डॉ. निरञ्जनशुक्ल महाभागाः जयौतिषशास्त्र वैशारद्यं समाजोपयोगे ग्रहफलिते विविधयज्ञादिषु विवाहादिषु पौरोहित्यकर्मणा निरतः।

**डॉ. सुरेशचन्द्रमिश्राः।** भारद्वाजगोत्रोत्पन्नोऽयं शुक्लयजुर्वेदस्य माध्यादिनी शाखाध्यायी अखिलेशस्य पुत्रः। अयं दिल्ली राज्यस्य दिल्लीनगरस्य निवासी। अस्य विद्याभ्यासे कास्यां श्री सम्पूर्णानन्द संस्कृत विश्वविद्यालये ज्यौतिषशास्त्रे अभवत्। अनन्तरं ज्यौतिषशास्त्रे Ph.D. पदवीं गृहीत्वा ज्यौतिषशास्त्रविषयक बृहत्तपाराशहोराशास्त्रंजातकपारिजातःसर्वार्थचिन्तामणिर्बृद्धयवनजाकादि ६० अधिकग्रन्थानां व्याख्या कृतवान्।

**चन्द्रकान्त जोशी।** शाण्डिल्यगोत्रोत्पन्नोऽयं शुक्लयजुर्वेदस्यमाध्यादिनी शाखाध्यायी औदिच्य ब्राह्मणः पुरुषोत्तमस्य पौत्रो बेचरस्य पुत्रः। अस्य जन्मकालो वैक्रमाब्दः १९९७=ख्रिस्ताब्दः १९४० = शकाब्दः १८६२ प्राप्यते। अयं गुजरातराज्यस्य वडोदरा प्रान्तस्य करजणग्रामस्य निवासी। अस्य विद्याभ्यासो वडोदरा संस्कृत महाविद्यालये (एम.एस.युनि. वडोदरा) पण्डित शिरोमणिर्लक्ष्मीकान्त झा शास्त्री महादेवप्रसाद जानी महोदयोः मार्गदर्शनेन अभवत्। १९८३ ख्रिस्ताब्दात् २००० पर्यन्तम् वडोदरा संस्कृत महाविद्यालयेऽध्यापकत्वे कार्य कृतवान्।

## प्रथमा दृष्टिः।

**शान्तिलाल जोशी।** गर्गगोत्रोत्पन्नोऽयं शुक्लयजुर्वेदस्य माध्यदिनी शाखाध्यायी औदिच्य सहस्त्रज्ञातियो ब्राह्मण: शिवरामस्य प्रपौत्रो रामजीभाई पौत्रो हिंमतलालस्य पुत्रोऽस्ति। अस्य समयो वैक्रमाब्द: २०१३ = ख्रिस्ताब्द: १९५३ = शकाब्द: १८७६। अस्य विद्याभ्यासो वाराणस्यां सम्पूर्णानन्द संस्कृत विश्वविद्यालये सम्पन्नो जात:। अनेन ज्यौतिषशास्त्रे आचार्यपदवीं गृहीत्वा गुजरातप्रान्तस्य खेडानगरसमीपे पेटलादग्रामे राजकीयसंस्कृतपाठशालायां ख्रिस्ताब्दात् १९८७ त: ज्यौतिषशास्त्रविभागे अध्यापनं क्रियते। अयं गुजरातमाध्यमिकशिक्षणसंस्थायां सोमनाथसंस्कृत-विश्वविद्यालये महाराजा सयाजिरावविश्वविद्यालये च ज्यौतिशास्त्रस्य विशिष्ट सेवार्थे नियुक्तोऽस्ति।

अनेन गोलप्रकाशाख्यो ग्रन्थो रचितो यत्र ज्यासमुत्पत्तिस्त्रिकोणमितिसिद्धान्तश्चापीयरेखागणितमित्या-द्याविषयावर्णिता। अनेन भास्करविरचितानां नैकेषां ग्रन्थानां टीकाकृता:।

**गङ्गाधर:।** कौशीकगोत्रोत्पन्नस्य वाजसनेयी माध्यन्दिनीशाखाध्यायीनोऽस्य पितामह अनन्त: पिता च नारायणेति ज्ञायते। सोऽयं देवगिरि (आधुनिकं दोलताबाद) समीपस्थस्य घश्मेश्वरज्योतिर्लिङ्गस्य समीपस्थे टापरेतिग्रामे निवसति स्म।

अनेन गणेशदैवज्ञ (वैक्रमाब्द: १५५५) विरचितस्य ग्रहलाघवस्योपरि मनोरमेति टीका लिखिता। 'मधुरेण समापयेऽदिति' लोकिकन्यायानुसारं काशीपरम्पराया: पण्डितवर्या लक्ष्मीपति: (वैक्रमाब्द: १८०५= खिस्ताब्द: १७४८= शकाब्द: १६७०) कृष्णदेव लक्ष्मीपति: (वैक्रमाब्द: १८३२= खिस्ताब्द: १७७५= शकाब्द: १६९७) लज्जाशङ्करशर्मा गुजरती मोढज्ञातियो ब्राह्मण: (वैक्रमाब्द: १८६१= खिस्ताब्द: १८०४= शकाब्द: १७२६) नन्दलालशर्मा सरयूपारीणो ब्राह्मण: (वैक्रमाब्द:१८०५=खिस्ताब्द:१७४८=शकाब्द:१६७०) देवकृष्णशर्मा (वैक्रमाब्द: १८७५= खिस्ताब्द: १८१८= शकाब्द:१७४०) चैते ज्यौतिषशास्त्रगगनस्था: प्रचण्डदिवाकरा येषां नामानि पुण्यानि प्रातस्मरणियानि च।

उपसंहार:। वैदिककालिकं ज्यौतिषशास्त्रविषयकमध्ययनं ज्यौतिषशास्त्रवृक्षस्य बीजम्। वेदाङ्गकालिकं ज्यौतिषमङ्कुर:। कल्पसूत्रादिकालिकं ज्यौतिषं पल्लव:। पुराणकालिकं ज्यौतिषं स्कन्ध:। वराहमिहिराचार्यभट्टादीनां प्रदानमेव ज्यौतिस्य पुष्पाणिफलानि चेति सुष्ठु फलितमत्र प्रकरणे।

## प्रथमा दृष्टिः।

अत्र वराहमिहिरादारभ्यैकविंशतिशतक पर्यन्तां ज्योतिर्विदां जीवनं प्रदानञ्च प्रस्तूयते। अतः परं पण्डितवर्याणां आचार्यश्री शिरोमणीनां श्रीमतां बलदेवोपाध्यायानां 'काशी कि पाण्डित्य परम्परा' नामक ग्रन्थस्य निर्देशोऽवश्यतया करणीयोत्राऽऽधुनिककालपर्यन्तानां परिचयः प्राप्यते। गुजरातप्रान्तस्य विख्याताणां कतिपय ज्योतिविर्दामपि परिचयोऽत्र संक्षेपेण प्रदत्तः।

-x-x-x-